No. १५२२

Title अनुमान मणि दीधिति टीकायां गादाधर्यां पत्रता टिप्पनी

Author गदाधर भट्टाचार्य:

Extent ४० Age x

Subject न्याय वैशेषिकं

अनुमानखण्डदीधितिटीकायां गादाधर्यां
पक्षता टिप्पनी

ग॰ १ ॐ श्रीगणेशाय नमः ॥ ॐ मूले व्याप्तिपक्षधर्मतयोः संगत्यप्रदर्शनन्यूनतां परिजिहीर्षुस्तयोरेककार्यकारि
त्वरूपां संगतिं प्रदर्शयन् व्याप्त्यनंतरमित्यादि मूलमवतारयति अनुमितीति अनुमितिलक्षणं अनुमितित्वरूपं यदेक
कार्यं तदनुकूलत्वसंगत्यात्तत्प्रयोजकत्वरूपसंगत्या प्रयोजकत्वं च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्म-
तयोः परामर्शनिष्ठकारणतावच्छेदकत्वेनानुमित्यजनकत्वेपि न क्षतिः यद्यपि पक्षतायानकारणतावच्छेद-
कघटकत्वेनामनंतर्भाव्यपर्वतादिवृत्तित्वेनैवानुमितिजनकत्वात्तथापि पक्षतायाअनुमितौ स्वातंत्र्येणैव तयात
दुपलक्षितधर्मिवृत्तितायाश्च कारणतावच्छेदकतया तत् घटितविशिष्टस्यैककार्यानुकूलत्वपक्षतमेवेति ध्ये
यं निरूपयितुमिति विनिरूपणं प्रतिपत्त्यनुकूलत्वेन तन्निरूपणत्वपक्षतयेवेति मूले पक्षता निरूपणेपि पक्षधर्म
तां निरूपयितुमित्यस्य नासंगतिः पक्षेधर्मत्वस्यापि निष्क्रान्त्यापक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमि
ति केचित् तच्चिंत्यं तथा त्वेले खनसंदेपनि बंधिनोद्वीधितिकारस्य पक्षतां निरूपयितुमित्यस्यापेक्षायां बीजाभावात्
व्याप्तीति व्याप्तिनिरूपणानंतरमिति मूलपाठाभिप्रायेण व्याप्त्यनंतरमिति पाठे च तत्र तत्र काराभावात् प्रत्यक्षेत्यादि पेक्ष्य
प्रत्यक्षत्वमित्याहीति रीत्या प्रत्यक्षोपजीवकत्वादित्यादि ग्रंथधारकस्य न त्याविधत्वेन असंगतेः तत्रेति मूले न तत्पदं
पक्षधर्मतापरं समभ्यर्थस्य घटकत्वेनान्वयस्यास्य पक्षत्वमित्यत्रैवान्वयं संदिग्धेत्यादि मूलग्रंथस्य संदिग्धः साध्य
रूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसंदेहवत्त्वं तादृशसंदेहपर्यवसितं पक्षत्वमित्यर्थः तत्र साध्येय
मत्वनिवेशानमफलं धर्मपदस्यार्थवत्त्वाय स्वस्मिन्संदिग्धं साध्यधर्मत्वं वह्नि ब्रीहिबलालान्ताध्यानिरूपितधर्मित्वपर्य-
वसितं पक्षत्वमित्यर्थोक्तौ साध्ये संदिग्धं स्वधर्मत्वं पक्षत्वमित्यर्थोक्तौ साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य चाप्रसिद्धिः स्थले
वक्ष्यमाणानुपपत्तिप्रयोजकं च एवं साध्यकोटिकसंशयस्य निवेशो साध्यं पक्षवृत्तिर्न वा साध्यं पक्षनिष्ठात्यंताभावप्रति-

योगि न वेत्यादिरूपसंशयासंग्रहः तादृशसंशयोपादाने यत्पक्षः साध्यवान्न वेत्यादिसंशयादनुमित्यनुपपत्तिरतो धर्मितां
शं परित्यज्य केवलान्वयिग्रंथे मणिकृता वक्ष्यमाणतथाविधसकलसंशयानुगमप्रकारं दर्शयति यद्धर्मेति यद्ध॰
र्मावच्छिन्ने सप्तम्यर्थश्च निरूपितत्वान्वयि विशेष्यत्वं साध्यस्य साध्यतावच्छेदकावच्छिन्नस्य षष्ठ्यर्थः प्रकारित्वं तस्यापि नि
ऐयेऽन्वयः तत्र तद्धर्मावच्छिन्ने सप्तम्यर्थोऽनुमितित्वव्यापि विशेष्यत्वं तादृशसंबंधेन साध्यानुमितौ तादृशसंबंधाव
च्छिन्नसाध्यतावच्छेदकावच्छिन्नविधेयताकानुमितिजनकभूतेत्यर्थः पक्षविशेष्यकसाध्याभाववैशिष्ट्यबुद्धाविव
साध्यधर्मिकपक्षावृत्तित्वपक्षतिच्छाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः साध्यवान्नेति निश्चयस्य प्राचीनमते प्रति
बंधकत्वात् साध्यं पक्षावृत्ति न वेत्यादिसंशयस्य संग्रहः एवं च धूमः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितधूमसंयो
गादिसंसर्गावच्छिन्नधूमवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसं
योगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबंधकताकसंशयो हेतुरिति निष्पर्या॰
वसितं तादृशनिश्चयप्रतिबध्यत्वस्य यथाश्रुतस्य वदादितिविषयकसमूहालंबनात्मकवह्निमत्तानिश्चयप्रतिब
ध्यघटादिसंशयसाधारणत्वात् तादृशनिश्चयत्वावच्छिन्नप्रतिबंधकतानिवेशः अवच्छिन्नत्वं चान्यूनवृत्तित्वं न तु स्व
रूपसंबंधविशेषः तेन वह्निसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनंतर्भाव्य वह्निमान् महानसी
यवह्निमानित्यादिसकलज्ञानसाधारणवह्नित्वाद्यवच्छिन्नवज्ञानिश्चयत्वेनैव प्रतिबंधकता कल्प्यनात्महान
सीयवह्निमान्वह्निसामान्याभाववान्वा पक्ष इत्याद्याकारकसंशयं प्रति महानसीयवह्नित्वाद्यवच्छिन्नप्रकार॰
ताकनिश्चयत्वेनाप्रतिबंधकत्वेऽपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानु
पपत्तिः न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रतिबंधकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारताकत्वादेर्नि

गदा. विशिष्टत्वेपि वह्निमानित्याद्यनुमितौ महानसीयवह्निमात्रबाधस्य इत्यादिसंशयस्य पक्षतावापत्तिः वस्तुतस्तत्तत्स्वरूप
संबंधरूपावच्छेदकत्वनिवेशे वह्निव्याप्यसामान्यसाध्यकस्थले वह्निव्याप्यधूमवान्नवेति संशयस्य पक्षतात्वाप-
त्तिः बाधनिश्चयप्रतिबध्यतावच्छेदकत्वनिष्ठव्याप्यधर्मविषयताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्र
तिबध्यतावच्छेदिकाया अपि व्याप्यधूमाभावविषयता साच न साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्र
2 तिबाध्यतावच्छेदकातद्वच्छिन्नप्रतिबाधकत्वया साध्यवत्तानिश्चयस्याप्रतिबंधकत्वेपि वह्निव्याप्यधूमाबभा-
वप्रत्यक्षप्रतिबंधकीभूतवह्निमिति सामग्रीघटः इत्थं चाहार्यस्य भ्रमत्वज्ञानास्कंदितस्य च निश्चयस्याप्रति
बंधकत्वात् तथा अनाहार्यत्वं भ्रमत्वज्ञानानास्कंदितत्वं च निश्चये विशेषणं देयमतो न तथाविधनिश्चयत्वानूनवृ-
त्तिप्रतिबंधकत्वाप्रसिद्धिः पर्वतो वह्निमान्नवेत्यादेः कस्यापि ज्ञानस्य धर्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मा
वच्छिन्नप्रकारकनिश्चयसाधारणसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वान्न नहीति प्रतिबंधक
ताकत्वं न संभवतीतिति प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारताविशेषणत्वं उपनीतभा
नात्मकबाधनिश्चयस्य साध्यवत्तानिश्चयसामान्यानिवर्तनीयतया भ्रमत्वज्ञानास्कंदितस्य च तस्यानुमित्यविरोधितया
तथाविधवारणाय आमनुमित्यापत्तिरतः संशयत्वनिवेशनं नच पक्षसाध्यविशेष्यकसंशयसाधारणस्याननिप्रस-
क्तसंशयत्वस्य दुर्वचतया पुनरननुगमतादवस्थ्यमिति वाच्यं बाधनिश्चयनिवर्जनीयत्वस्यैवात्र संशयपदेन विव
क्षितत्वात् केवलान्वयिनि प्रपि साध्ये पक्षनिष्ठाभावप्रतियोगित्वनिश्चयप्रसक्तभो बाधप्रकाविधवा धोपादाने नैव वि
धसंशयाननुगमसंभवात् तदननुगमेन तद्घटकस्याप्यननुगमस्यापि कथंचित्संभवात् यत्र पक्षसाध्यवैशिष्ट्यावगाहि
त्वमेव संशयपदेन विवक्षितमिति नाननुगमः साध्यं पक्षवृत्ति नवेति साध्यविशेष्यकसंशयस्यापि तथात्वात् तदसत्

तथा सति साध्यपक्षवैशिष्ट्यानवगाहित्वात् साध्यं पक्षनिष्ठाभावप्रतियोगि वेति संशयस्यासंग्रहात् नच केवलान्व
यिस्थले साध्यपक्षवृत्तिर्न वेत्येतादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहे न दोषायेति वाच्यं प्र
मेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयस्य केवलान्वयिग्रन्थे मणिकृतैव संगृहीतत्वात् तद्विरोधात् वस्तुतस्त
तादात्म्यसंबंधेन वाच्यसाध्यकप्रमेयपक्षकस्थले च तादृशाया अप्रसिद्धेः तादात्म्यसंबंधेन पक्षसंबंधत्वाभावरूपको
ट्यप्रसिद्धेः नच साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतात्वेऽप्युक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रेणा
नुमितेः हृदेऽपि पक्षतावच्छेदकावच्छेदेन वर्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव साध्यवत्तानिश्चयप्रतिबंधकतया पक्षता
त्वमंगीकार्यं न च तन्न संभवति प्रमेयत्वाद्यवच्छेदेन वर्तमानभेदाप्रसिध्या कोट्यप्रसिद्धेरिति वाच्यं तत्र पक्षतावच्छेदकावच्छिन्न
वृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभाव
कोटिकसंशयस्य पक्षतात्वोपगमात् वस्तुतस्तु पक्षतावच्छेदकावच्छेदेन वर्तमानघटपटोभयत्वावच्छिन्नभेदस्यैव प्रसिध्या
साध्यतावच्छेदकावच्छिन्नेनादृशप्रतियोगित्वकोटिकसंशयस्य पक्षतात्वसंभवात् एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थ
लेसाध्यपक्षवैशिष्ट्यावगाहिसंशयानुपपत्तेः तत्र साध्यात्मकाभावप्रतियोगिनि पक्षवन्नत्वादिसंशयस्यैव पक्षतात्वा
त् अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान्न वा पक्ष इत्यादिसंशय
स्य पक्षतात्वप्रसंगः साध्यवत्तानिश्चयनिवर्त्यत्वात् नच सिद्धसाधनस्थले अनुमितिवारणमेव पक्षताहेतुत्वकल्प
नफलं एवं चोक्तसंशयस्यानुमितिहेतुत्वोपगमेऽपि सिद्धिदशायामनुमित्यापत्त्यसंभवात् तस्य पक्षतात्वमिष्टमेवेति वाच्यं सा
ध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्य पक्षसंबंधावगाहिसाध्यसंदेहस्यैव प्राचीनैः पक्षतात्वोपगमात् अन्यथा
बाधसाधारणरूपेण पक्षतात्वोपगमेऽपि सिद्धिकाले अनुमितिवारणासंभवात् बाधवारकसंशयत्वनिवेशस्यापि निष्प्रयोजनकत्वा

पक्षे॰ न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूपबाधाप्रतिबध्यतया नातिप्रसंग इति वाच्यं वह्निव्याप्याभावा
न्पर्वतः पर्वतो वह्निमान्न वेति संशयस्य तादृशबाधनिश्चयप्रतिबध्यतैव तावतापि तद्वारणासंभवात् यत्प्रकारतासाध्यतावच्छे
दकावच्छिन्नविषयितावघटितधर्मावच्छिन्नप्रतिबध्यताया निवेशान्नोक्तातिप्रसंगः वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नवह्निव्या
प्यवत्तानिश्चयप्रतिबध्यताया निवेशान्नोक्तातिप्रसंगः वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नवह्निव्याप्यवत्तानिश्चयप्रतिबध्यता॰
या अवच्छेदककोटौ वह्निव्याप्यत्वाद्यवच्छिन्नविषयताया अनंतर्भावादिति तन्न वह्न्यभावादिसाध्यकस्थले वह्निमान्न वेत्यादि॰
संशयसंग्रहप्रसंगात् वह्निविशिष्टबुद्धित्वावच्छिन्नाया वह्न्यभावादिगर्भवह्न्यभाववत्त्वानिश्चयप्रतिबध्यताया अवच्छेदकावच्छि
न्नविषयताया अनिवेशे यत्र च वह्निव्याप्यत्वाद्यवच्छिन्नस्यैव पक्षत्वं साध्यत्वं च तत्र वह्निव्याप्यं वह्निमन्नैवेति संशयवारणासा
शक्यत्वात् यत्र साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयतावच्छेदकविषयितावघटितधर्मावच्छिन्नत्वेन प्रतिबध्यताया निवेश
नीयतया वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावादिनिश्चयत्वेनाप्रतिबंधकतया तद्विषयतायाः साध्यवत्ताज्ञानप्रतिबंधकता
वच्छेदकत्वविरहेण नातिप्रसंग इति तदपि न तावतापि महानसीयवह्नित्वावच्छिन्नसाध्यकस्थले महानसीयवह्न्यभावाभा
वात्पर्वतः स वह्निमान्न वेति संशयवारणासंभवात् अत्रोच्यते संशयत्वं निष्ठविषयतावघटितधर्मावच्छिन्नप्रतिबंधकतानि
रूपितप्रतिबध्यताशालित्वं ज्ञानभेदेन विषयिताभेदानभ्युपगमात् संशयनिष्ठवह्निमत्पर्वतादिविषयताया अपि प्रत्येकं
निश्चयप्रतित्वात् प्रतिबंधकतावच्छेदकघटकत्वोपपत्ति वह्न्यादिसाध्यकस्थले वह्न्यभाववान्पर्वतो घटवान्न वेत्याका
रकसंशयस्यातादृशधर्माक्रांतस्य साध्यवत्तानिश्चयप्रतिबध्यत्ववारणाय साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानि
रूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वाघटकप्रतिबध्यता विशेषणीया न च संशयत्वघटकप्रतिब
ध्यतानिश्चयत्वावच्छिन्ननिरूपितत्वमेव निविष्टतां किं तत्र प्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनेनेति वाच्यम् १

तथा सति पक्षनिष्ठाभावप्रतियोगिनवेति संशयस्यासंग्रहापत्तेः तथाहि बाधप्रतिबध्यतावच्छेदिकास्वनिष्ठ-
विषयता साध्याविषयतानिरूपितताद्दृशप्रतियोगित्वाभावविषयतैव तद्घटितधर्मावच्छिन्नप्रतिबंधकतानिरूपित-
ताद्दृशप्रतियोगित्वत्वावच्छिन्नाप्रतिबध्यतायास्साध्यवत्तानिश्चयत्वावच्छिन्नाप्रतिबध्यतैकत्वान्निरूपितत्वादिमत्वाज्ञा-
नत्वावच्छिन्नप्रतिबध्यतायाश्च तथात्वान्नातिप्रसंगः तच्च वह्न्यभाववान्नवेति संशयस्य पक्षतात्वमिष्टमेव तस्य वह्निः
पक्षनिष्ठाभावप्रतियोगिनवेति संशयसमशीलत्वात् स्वनिष्ठविषयतायां च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनी-
यं तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्नवा पक्ष इत्येताद्दृशसंशयस्य व्युदासः न च वह्निव्याप्याभावाभावत्वेन व्याप्यस्य
पृथक्भानेपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयताया वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छे-
दकत्वविरहात् एवं च शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येताद्दृशबाधनिश्चयप्रतिब-
ध्यस्य महानसीयवह्निमान्नवा पक्ष इत्येताद्दृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यता-
वच्छेदकावच्छिन्नत्वनिवेशनं सफलमित्यवधेयं एतेनावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधि-
करण्यमात्रेण कोटिद्वयावगाहिन्यो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेपि निरुक्तसंश-
यत्वाभावेन न पक्षतात्वमिति संक्षेपः अथावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयसमुच्चयस्य पक्षता-
त्वापत्तिः तस्यापि उक्तलक्षणाक्रान्तत्वात् न च विरोधावगाहित्वनिवेशान्न तद्वारणसंभवः क्वचित्किंचित्प्रतियोगिक
विरोधभावनस्य समुच्चयेप्यक्षतत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं सकालसंशयसाधारणस्यासंभ-
वात् इति चेन्न संयोगादेरव्याप्यवृत्तित्वज्ञानदशायां तद्वत्वग्रहविषयीभूतधर्मिणि तदभावादिवादिग्रहोत्पत्त्या
तद्वत्ताग्रहस्य तदभावग्रहप्रतिबंधकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्र-

गदा०

4

तिबंधकतोपेयते व्याप्यवृत्तित्वे चानवच्छिन्नाधारताकत्वं सर्वत्र प्रतिबंधकतावच्छेदकताघटकाधारतायाश्चेतेतः संसर्गविधयैव भान-
मुपेयते एवं च समुच्चयनिष्ठकोटिविषयितानवविपरीतधीप्रतिबंधकतावच्छेदिकाव्याप्यवृत्तित्वविषयित्वानिरूपितत्वात्
अत उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासंभवेन तत्स्वपदत्तात्वापत्तिविरहात्व अथवा स्वघटितधर्मावच्छिन्नप्र-
तिबंधकतानिरूपितप्रतिबंध्यताच्छेदकीभूतायास्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयतानिरूपिती
प्रकारितासामानाधिकरण्यसंबंधेन तद्विशिष्टप्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये विरोधाभानेन कोटिद्वय-
विषययोर्विरोधयित्वानिरूपितत्वात् संशये चातः कोट्योः संसर्गतयापि परस्परविरोधविषयित्वानिरूपितत्वात् संश-
भानोपगमेन संकलसंशयसंग्रहः यदंशे संशयत्वं न तत्कोटिविरोधस्यैवोक्तरूपेणोपादानसंभवान्नवरूपत्वेन न च विरो-
धभानमादायातिप्रसंग इति केचित्तु साध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकविशेष्यतापालित्वं
समुदितार्थः संशये धर्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता समुच्चयवैलक्षण्यायोपगम्यते इ-
ति तादृशविषयताया विभिन्नरूपेणोभयनिश्चयप्रतिबध्यतावच्छेदकतयानासंभव इत्याहुः तच्चिंत्यं प्रकृत
पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमपेक्ष्य निरुक्तरूपेण संशयत्वनिवेशान
प्रयोजनं दर्शयति तेनेति पक्षेति न पक्षविशेष्यकस्य पक्षः साध्यवान्नवेत्याकारकस्य साध्यविशेष्यकस्य साध्यं पक्षवृत्ति
नवेत्याकारकस्य संशयस्यानुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणताभज्येतेति भावः इदमुप-
लक्षणं साध्याभावसाध्यवद्भेदादिकोटिकसंशयानुगमोऽपि बोध्यः विशिष्य संदेहदशायां निर्णीतसंबंधेन पक्षांशे साध्यी-
यसंसर्गविषयतत्कालीननिर्णयविषयीभूततत्संबंधेन पक्षतदनंतरमनुमितावितिपूरणीयं तत्संबंधेन संशयोऽसत्त्वेऽपि त-
त्संबंधेन सिद्धिशून्यकाले दृष्टापत्तिसंभवान्निर्णीतेत्युक्तं संबंधमनिवेश्य साध्यनिर्णयसामान्यनिवर्त्यत्वनिवेशे ऽप्रसि

द्धिप्रसंगः यन्निवर्त्यत्वं यत्किंचित्संसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यद्दिनिवेशे पतेतद्वायमतिप्रसंगि-
बोध्यः धर्मत्वोक्तसंसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यद्दिनिवेशे पतेतद्वायमतिप्रसंगि बोध्यः एपरित्याप्रयोजनमाह
नेवानमः प्रभृतिच्छित्तिस्वधर्मत्वसंशयविषयसाध्यकत्वपक्षत्वमित्यत्रैव स्वधर्मत्वनिवेशेऽव्यवृत्तिसाध्यकघटादिप-
क्षकस्थलेन पक्षतावैकल्यं च घटादिसमवेतत्वस्य प्रसिध्या गगनादौ तत्संशयसंभवादिति नमः प्रभृति पर्यंतस्य पक्षत्वानु-
सरणं तथा च साध्ये संबंधांतरेण पक्षवृत्तित्वसंदेहदशायां निर्णीतसंबंधेनानुमितिवारणाय प्रकृतसाध्यतावच्छेदका
संबंधेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया नमः प्रभृतिसमवेतत्वस्याप्रसिध्या साध्ये पक्षवृत्तित्वसंशयपादयापि
न तत्र पक्षतोपपत्तिरिति भावः स्वरूपसंबंधेन नमोवृत्तित्वस्य प्रसिद्धात्तेन संबंधेनानुमितौ नानुपपत्तिरतः समवाये
नेति पक्षे साध्यीयसाध्यतावच्छेदकसंबंधावच्छिन्नधर्मितासंशयस्य पक्षतात्वे नमः प्रभृतिषु वृत्तिमत्साध्यसाधनेनानुप-
पत्तिरत आकाशादीति तन्नैवाल्यं पक्षतावैकाल्यमंदिग्धोऽनुमितौ हेतुः विशेषणतया स्वधर्मतात्ता नानिश्चयं तज्जनक-
तायामवच्छेदको वाऽऽश्रयवाउपलक्षणतया तादृशजनकतायामवच्छेदकं तत्राद्यपक्षद्वयं दूषयति मूले संदेह इति विशेष-
णं अपेक्षणीयानुमित्यव्यवहितप्राक्क्षणावच्छिन्नानुमितिकारणं विशेषणविधया ऽनुमितिकारणतावच्छेदकमिति या-
वत् परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः यत्रादौ लिंगदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण लिंगदर्शनस्य यत्र-
लयोर्विपरीतक्रमः एतदभिप्रायेण व्याप्तिस्मरणस्य चाशकत्वमभिहितं अतः अतः एकत्रोभयोर्नाशकत्वासंभवेऽपि न क्ष-
तिः आदिपदेन तत्र संशयानंतरक्षणं व्याप्तिस्मरणाद्यनुगुणज्ञानोत्पादक्षणदनंतरमेव व्याप्तिस्मरणादित्यत्र तादृशज्ञान-
संग्रहः तृतीयं दूषयति नोपलक्षणमिति अव्यावर्तकतापत्तेः सिद्धिस्थलेऽनुमित्यवारकतापत्तेः तत्कालीनपराम-
र्शस्यापि कालांतरीणसंशयविषयधर्मिवृत्तित्वावगाहितया सामग्र्याः सत्त्वादिति भावः अथ साध्यसंदेहोऽनुमितौ हेतु-

5

देवलिंगदर्शनादेः पूर्वोत्पन्नस्य संशयस्य तेन विनाशेपि तदनंतरं परामर्शाव्यवहितप्राक्क्षणे संशयांतरादेवानुमितिरिति का-
ल्प्यते न च यत्र चानुत्पन्न एव संशये यत्र स्वसामग्रीवशात्परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसंगः परामर्शकाले तदुत्पन्नं च
विशेषदर्शनरूपप्रतिबंधकवशेन संशयोत्पादासंभवादिति वाच्यं फलबलेनैव सर्वत्रैवानुमित्युपधायकपरामर्शाव्यव-
हितप्राक्क्षणे संशयोत्पादकल्पनात् यत्र संशयोत्पादद्वितीयक्षण एव परामर्शसामग्री प्रमाणसिद्धा तत्र वा परामर्शसा-
मग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शानंतरं साध्यस्य प्रत्यक्षनिश्चय एवोपगम्यते न तत एव
प्रवृत्त्याद्युपपत्तेः तत्रानुमिनोमीत्यनुव्यवसायस्याप्यगत्या भ्रमत्वमेव कल्प्यते अनुगताननुगतसिसाधयिषाभावकूटवि-
शिष्टसिध्यभावस्यानुमितिहेतुत्वापेक्षया संशये हेतुतायां लाघवात् संशयहेतुत्वोपगमे बाधनिश्चयदशायां पायाभा-
वादेवानुमितिनिवारणसंभवान्नानाविधबाधाभावस्यानुमितिहेतुत्वाकल्पनेनानुमितिसामग्रीप्रतिबंधकतायां तदतिवे-
शेन बलाद्यावातजनकत्वानविरोधितचैव च वादादीनां हेत्वाभासत्वोपपत्तेः संशयस्य च कार्यतावच्छेदककोटौ कारणवैशि-
ष्ट्यं निवेश्य विशिष्यतात्पर्यसंशयत्वेनैव हेतुता वाच्या अतो दीधितिकारोक्तप्रकारस्य निरुक्तसंशयत्वघटकस्वत्वघटित-
तया स्वत्वाननुगमेन प्रतिबध्यतादानीत्वस्यावच्छेदकभेदेन भिन्नानामननुगतत्वेन वशाह्यानुगममात्रपर्यवसानेपि न क्षतिः
संशयस्य बाधसाधारणान्तद्भाववज्ज्ञानत्वेन कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वे-
न कारणत्वं न तु पक्षधर्मिकसाध्यतदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वेन गौरवात् बाधनिश्चयदशायां च नानुमित्या-
पत्तिसंभवः प्रत्यक्षादिसाधारणलौकिकविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबंधकतायाः आवश्यकत्वादि-
ति चेन्न एवं बाधनिश्चये प्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविर-
हेणाविशेषात् साध्यसंदेहे प्रामाण्यग्रहसत्त्वेप्यनुमित्युपगमे तु तादृशविरहात् संशये प्रामाण्यनिश्चयत्वावच्छिन्नाभाव-

स्यैव निवेशनीयतया अप्रामाण्यशंकाकलंकादिना बाधनिश्चयादनुमितेरुर्वीरत्वाच्चेति चेत् । प्रत्यक्षादिनानिर्णीतस्यापि सा-
ध्यस्यानुमित्सयाऽनुमितेरनुभविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेः अनुभवापलापे विशेषदर्शनमूलकप्रत्यक्षादे-
वस्त्वेव प्रवृत्त्यादिसंभवे ऽनुमानप्रामाण्यमात्रस्यैव विलयापत्तेः एवं अप्रसिद्धसाधकस्थले संशयसंभवादनुमित्यनुपप-
त्तेः संशयानन्तरजातसिद्ध्यात्मकपरामर्शादनुमित्यापत्तेश्चेति संक्षेपः संशयनाशोपि यावत् न निर्णयस्तावत्पर्यन्तं संशय-
योग्यताया अनयात स्यापवपक्षतात्वे संभवतीति तदृनिराकरणे मूलस्य न्यूनताऽतो नायातिस्थलेप्येवमेवमेव संशययो-
ग्यतानिराकरणपरतया व्याचष्टे संशययोग्यतानिराकरणपरतयाव्याचेति साधकबाधकमानपदस्य सिद्धिबाधहेतुभू-
परामर्शपरत्वे सर्वदैवानुमित्यनुपपत्तिः अनुमितिपूर्वं सिद्धिबाधहेतुभूतवह्न्यादेः सिद्धिहेतुभूतपरामर्शस्य च-
सर्वदैव सत्त्वादत उक्तं सिद्धिबाधपरतया व्याचष्टे साधकेति यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेपि न
क्षतिः बाधसामग्र्यनन्तरक्षणे कदाचिदप्यनुमितेरनुत्पादात् तथापि बाधजनकत्वमात्रेण तत्सामग्रीपरत्वे तत्परत्वे-
च विना द्व्यवच्छिन्नाभावस्य हेतुत्वालाभात् अत्र चोक्तैवानुपपत्तिः बाधसामग्रीत्वेन तत्परत्वं च विना लक्षणान्निर्वहतीति
लक्षणाया आवश्यकत्वे बाधपदे लक्षणोचितेत्यभिप्रायेणेदं न त्वपक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि सा-
ध्याभावाप्रसिद्ध्या बाधाप्रसिद्धिरिति तद्भावघटितपक्षतावैकल्यमतआह केवलान्वयिनि चेति पक्षतिघटनि साध्यइत्या-
दिः धीः निर्णयः स्खलभः बाधइति तथा वक्ताहृष्टाबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः स्खलभङ्ग-
त्यनेन तत्राभावांशे साध्यीयत्वधमात्मकबाधस्यापि कदाचिन्निरूपस्य प्रसिध्यात् तद्भावघटितत्वमपि पक्षतायाः संभवती-
ति सूचितम् व्याप्तिस्मरणादिना पूर्वानुमित्यानाशस्थलेऽनुमितिमप्युपाद्य सिसाधयिषाविरहेत्यादिस्थलमवतारय-
ति न त्विति तत्रापि परामर्शापूर्वमनुमित्सानाशस्थलेपि पुनरनुमित्सापरामर्शानन्तरं अनुमित्सानन्तरं परामर्शानन्तरो।

त्यन्नेनेच्छाजनकज्ञानेनेच्छाजननसमकालं परामर्शस्यनाशान्न दृष्टेच्छातः कथमनुमितिरित्यतआह ततश्च परामर्शान्तरमि
तिविनष्टपदवस्थानुमित्तयाऽनुमितिमुपपाद्याविनष्टपदवस्थयामप्युपपादयति स्मरणात्मकाद्वेदितिचाक्षुषादिपरामर्श॰
स्यानुमित्यंशेऽदृष्टसाधनताप्रकारकसमूहालंबनत्वेनोपपद्यतेऽस्यायोग्यविशेष्यकज्ञानजनने इंद्रियस्यासामर्थ्यात्तत्रतत्त
स्यतथात्वमुपेत्यतन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात्सर्वानुमित्साजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात्स॰
मूहालंबनस्मरणात्मकपरामर्शान्तरस्यानुसरणेऽस्मपलक्षणं तथाविधमानसपरामर्शोपिबोध्यः ननुकल्पकाभावान्नेना
दृशाकल्पनासंभवइत्याशंकांपरिहरति फलबलादितिसिसाधयिषाद्युपकारणं विनाऽनुमित्यात्मककार्योत्पत्तिबला
दित्यर्थः सिसाधयिषाविरहेयोतिमूलस्यानुमानेत्यादिः तेनेश्वरस्यसिसाधयिषायाअसत्त्वादसत्त्वेपिनक्षतिः इच्छाद्युप
पत्तातायाश्रात्मनिष्ठप्रत्यासत्त्यैवहेतुतेत्यभिप्रायेणेदं नचतत्रातिप्रसंगवत्फलबलादनुमित्सांकल्पयित्वाऽनुमितिप्रा॰
क्तेोपपत्तिकातत्रतत्स्वभावस्यानुभवसिद्धतयाकल्पनासंभवात् सर्वकदापियस्यमेचानुमितिर्नासीत्तेनतत्रेष्टसाधनता॰
याऽगृहीतत्वेनतद्गोचरस्मरणस्यतदनुमित्यनुभावकस्यतदानीमभावेनतदोवानुभवस्यचासंभवेनतदनुमित्साऽसतामर
णापवदसंघटत्वाच्चविषयनिष्ठप्रत्यासत्त्यैवानुमित्सायाहेतुतावाच्येत्यभिप्रायेणउक्तस्थलेपक्षतापपत्तिंदीधितिकृदाशंक
ते नचानुमितौनिरुक्तेवसमानाधिकरणव्यधिकरणासाधारणेच्छामात्रमेवस्वनिष्ठेवानुमात्रसमवेतैवतस्याईश्वरे॰
यापक्षताप्रसंगादितितथाचसिध्यनंतरमप्यनुमित्यापत्तिरित्यर्थः तदानीसिद्धसाधनदृष्टायां ननुज नुन्यकाचमितित
याचानुमितिजनकत्वविशिष्टेच्छात्वेनैवहेतुताकारणतावच्छेदकविशिष्टस्यमात्रसत्त्वमेवफलोपधानेतंत्रमितिनातिप्र
संगइतिभावः अनुमितिजनकत्वेनजनकत्वेऽआत्माश्रयसत्त्वेपिस्फुटत्वात्तदुपेक्ष्यदूषणांतरमाह तदीतियोग्यता
स्वरूपयोग्यता अनयायाऽरिति कारणतावच्छेदकधर्मरूपयोग्यतायाः सर्वदैवसत्त्वादित्यर्थः तद्रूपधानंतद्वैशिष्ट्यंतद

भावात् अनुमितिवैशिष्ट्याभावात् तथा चानुमितित्वादिनियामिका या अनुमितिविशिष्टेच्छा याः प्रागसत्वात्
अनुमितेरेवानुपपत्तिः इदमुपलक्षणं अनुमित्यजनकमध्यनुमित्यापत्तिरपि द्रष्टव्या न त्वनुमितिजनकतावच्छेद
कायावंतो धर्माः प्रत्येकं तदवच्छिन्नहाटविशिष्टत्वरूपतत्सामग्रीसमवधानमेवेच्छाविशेषणं देयं तच्च तत्का
र्याव्यवहितप्राक्क्षण एवेति नातिप्रसंग इत्याशंकां परिहरति न च तत्सामग्रीति कारणमात्रस्येति तथा च पर
मर्शोद्यसत्वदशायामीदृशसामग्रीपक्षताविरहादेवानुमितिवारणसंभवात्परामर्शादीनां हेतुताविलयप्रसंग
इति भावः नन्वसामग्रीसमवहितेच्छात्वेन न पक्षताया हेतुत्वं प्रेयते सामग्रीघटकाहेतुत्वेनाविशेष्यविशेषणभा
वे विनिगमनाविरहात् तेषां स्वतंत्रकारणतयैवातिप्रसंगस्य वारितत्वात् किंत्वीश्वरेच्छामादाय वह्निसिद्धिकाले पक्ष
ताव्यवहारवारणाय पदप्रवृत्तिनिमित्तत्वमेव तावद्दूषणे प्रेयते अतो नायं दोष इत्यतो दूषणांतरमाह यो वेति अनु
मिति सामग्र्या एव पक्षतात्वसंभवे न इच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः अवच्छेदपक्षो
दूषणांतरमाह तदानीमिति तदानीं परामर्शादिसमवहितासिद्धिदशायां अन्वयव्याप्तस्य सामग्रीविरहेण वह्न्यव्या
प्यतापातात् सामग्रीमध्यनिवेशप्रयासात् तथा चैतादृशाकारणां सिषाधयिषाविशिष्टसिद्ध्यभाव एव पक्षत्वं च तस्यैव पक्षता
त्वमस्तु अले कारणांतरस्य पक्षताशरीरे निवेशेनेति सिद्धांतलक्षण एव पर्यवसानमिति भावः सिद्धांतलक्षणे सिद्धुत
रक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सहकारिणां ते विशेषणमुपात्तं तच्च तदैवोपपद्यते यदि सिद्धिसिषाधयिषा
परामर्शानां त्रयाणामनुमित्यव्यवहितपूर्वक्षणेऽवस्थितिः संभवति न चैवमुपपद्यते आत्मयोग्यविशेषगुणानां हि
क्षणमात्रस्थायित्वात् त्रयाणां युगपदवस्थानासंभवात् ननु यत्रापेक्षाबुद्ध्यात्मकस्य परामर्शस्य साध्यनिश्चयस्य चा
प्रथममुत्पादस्तत्रैव तत् तृतीयक्षणे त्रयाणामवस्थानं संभवतीति वाच्यं अपि तावद्बुद्धेः क्षणत्रयावस्थायित्वमंगीकृ

गदा॰

7

वीशेषस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात् अन्यथा स्वसमानाधिकरणस्वनन्तरो
त्पन्नविशेषगुणात्मकनाशकबलात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशंकां परिजिहीर्षया सिद्धात्म
कसमूहालंबनपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति यद्वेत्यादिना अनुमित्साव्यवहितोत्तरक्षणे
विशिष्टपक्षप्रत्यक्षं न संभवति इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात् इच्छापूर्वक्ष
णे तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्त्वेन तस्या एवोत्पत्तिसंभव इत्यतो विशिष्टस्म
रणानुस्मरणे न्यूनताभंगाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनंतरक्षणोत्पन्नेच्छास्थले तद्दर्शयति
अनुमितीति यद्वेत्यनुषज्यते इच्छासामग्रीसंपन्नापि अनुमितीष्टसाधनताविषयकेति तादृशस्मरणात् साध्यतद्व्या
प्यविशिष्टपक्षस्मरणात् पूर्वोक्तानुमित्या चात्र घटादिपरामर्शस्यानुमितौ इष्टसाधनत्वावगाहित्वासंभवात् यत्र परामर्
र्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षणकाले व्यस्य संभवेन तस्याः परामर्शोत्पत्तिसमये नाशात् तदुत्तरं
अनुमित्साया असंभवे इष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात् स्मरणपर्यन्तानुभवनेनानंतापरिहाराय प्र
त्यक्षस्थले प्रयोजनमाह अनुमित्सापूर्वेति अत्रापि यद्वेत्यनुषज्यते प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्थले त
ज्जनकसंनिकर्षादितः तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भविष्यति नत्विच्छा विनश्यदवस्थसंनिकर्षाद्विशेषणप्र
त्यक्षानुधावने च प्रयासगौरवमतो विशेषणस्मरणपर्यन्तानुधावनं अनुमित्सापूर्वकाले परामर्शजनकसंनिकर्षादेः
सत्त्वे तस्या एवानुपपत्तिरतो अनुमित्साकालोत्पन्नेन्द्रियसंनिकर्षसहितादिति सहकृतान्तं सहकृतान्तभागोपस्थाप्य
सिषाधयिषाविरहविशिष्टत्वं तस्याभावविशेषणत्वे सिसाधयिषादशायां तदभावविशिष्टस्य सिध्यभावस्यासंभवा
त्सिषाधयिषा सत्यामसत्यां चानुमित्यनुपपत्तिरतः साधकमानविशेषाणामिति सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे

प्रत्यक्षत्वादिप्रकारकेच्छाबलात् तत्तत्प्रत्यक्षसामग्र्यां सिद्धिदशायामनुमित्यापत्तिः अनुमित्यापत्तिः अनुमि
तिगोचरेच्छापक्षत्वेपि यत्किंचित्गोचरज्ञानं जायतामितीच्छाबलात् सिद्धिकालेनुमितिर्दुष्टैवेति वा त्वापत्तिः
नचानुमितित्वत्वस्यापि तादृशेच्छाविषयत्वसिद्धे तत्रानुमितिर्दुष्टैवेति वाच्यं प्रत्यक्षतानुमितित्वस्यैव यादृशेच्छाया वि
षयत्वसिद्धिस्तादृशेच्छासत्त्वएव सिद्धिकालेऽनुमितेरानुभविकत्वात् उक्तेच्छायाश्चान्ततः उपस्थितपदार्थगोचरमान
सज्ञानेनापि विषयत्वसिद्धाः किंचित्कारत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे सिषाधयिषा चेति घट विशिष्ट
पर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे सिद्धिसत्त्वेपि नानुमितिरनुभवाद्यत्र तत्साध्यविशिष्टेति तत्संबंधे
न तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः तेन कालिकसंबंधेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतां
द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्यतादृशेच्छासत्त्वेपि सिद्धिकाले संयोगादिना न वह्निवा
वच्छिन्नस्यानुमितिः वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयका
नुमितिर्जायतामितीच्छाबलात्पर्वतो वह्निमानित्यनुमित्यनुत्पादे तत्पदेनेति तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः
न च यत्किंचिद्विषयगोचरज्ञानं जायतामितीच्छाबलादिवालोकवान्पर्वत इत्याद्यनुमितिसामग्रीदशायां वह्निमत्पर्वते
विषयकानुमितिर्जायतामितीच्छाबहुलादपि सिद्धिसत्त्वे वह्न्यनुमितिर्न जायते तत्कालीनसिद्धप्रतिबध्या लोकानु
मितित्वत्वस्यैव तादृशेच्छाविषयत्वात् सर्वह्निमत्पर्वतविषयकानुमितिसिद्धेरित्थं तादृशेणापि इच्छायाउत्तेजक
त्वं न संभवतीति वाच्यं साध्यविशिष्टपक्षनिरूपितविषयिताप्रकारकत्वेनैव च इच्छायाउत्तेजकत्वोपगमात् आ
लोकवान्पर्वत इत्याद्यनुमितेर्वह्निविशिष्टनिरूपितविलक्षणविषयिताशून्यत्वेनानुत्पत्त्या तादृशविषयिताप्र
२१४ कारकेच्छाविषयसिद्धसंभवात् साध्यविशिष्टपक्षनिरूपितत्वं च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्व

गदा॰

8

अतो ह्रदो वह्निमानित्यसंसाध्यविशिष्टपक्षतास्त्यवपि न तादृशविषयितायास्तत्प्रकारकानुमित्साधायकाप्रसि।
द्धिः ह्रदादिनिष्ठतादृशभ्रमीयविषयितानिरूपकत्वस्यापि ह्रदांशे प्रकारीभूतवह्न्याद्यवच्छिन्नत्वात् वस्तु।
तस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेत्यनेन तत्साध्यतावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपित
त्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वपर्यन्तं विवक्षितमतो वह्निमान्पर्वतो घटवानित्याद्यनुमितिसामग्रीदशा।
यां पर्वतो ह्रदश्च वह्निमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छावच्छावलात्पर्वतादिपक्षकवह्न्यादिवि
धेयकानुमित्यनुत्पादेऽपि न क्षतिः तादृशोद्देश्यतात्वेन वा तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं तेन केवल
पर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताप्रकारकानुमित्यादृशायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेः।
सिद्धिसत्त्वे न वह्न्यनुमित्युपपत्तिः एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयं अन्यथा।
जातिमान्वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वे नवच्छिन्नत्वानवगाहीच्छाकाले पर्वतो
वह्निमानित्यनुमित्यापत्तेः पर्वतो वह्निव्याप्यवानिति परामर्शकालीनजातिमान्वह्निव्याप्यवानिति परामर्शका
लीनजातिमान्वह्निव्याप्यवानिति परामर्शशून्यकालीनानवच्छिन्नत्वानवगाहीच्छानां वृत्ततत्तव्याप्तित्वेनानु
तेजकत्वमिति बोध्यं साध्यविशिष्टपक्षकत्वप्रकारकत्वनिवेशनप्रयोजनं दर्शयति यत्किंचिदिति यत्किं
चिद्विषयकत्वप्रकारकत्वं निवेशनीयम् यत्किंचिज्ज्ञानं जायतामित्यादीच्छावारणं संभवतीति यत्किंचिद्विषयकत्वप्र।
कारकेच्छानुधावनं न चेच्छा सर्वं यत्किंचिज्ज्ञाविशेषज्ञानस्यावश्यंसिद्धत्वात्तादृशेच्छैव न संभवति ज्ञानगोचरेच्छायास्तु
ज्ञानसत्त्वात्स्वविषयसिद्धेरेवविरोधित्वात् तदुक्तं नहि ज्ञाने जाते ज्ञानेच्छा भवतीति वाच्यं एतदुक्तावपि यत्किंचिज्ज्ञोचर
ज्ञानं जायतामित्याद्याकारकेच्छाया एव विवक्षितत्वात् नन्वनुमितित्वप्रकारकत्वं निवेशेपि च न तथाविधेच्छाया वारण।

णसंभवे किं गृहीतसाध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशेनेत्यत आह अनुमितित्वाप्रकारिक्या
यामिति प्रत्यक्षात्मकासिसाधयिषायां पर्वते वह्निज्ञानं जायतामित्याकारकेच्छानसंभवेपि तद्विषयीभूतप्रत्यक्षा
दिरूपसिद्धेरेवसिद्धत्वात् अतः प्रत्यक्षाद्यतिरिक्तामिति प्राहुः आदिरूपसिद्धौ प्रत्यक्षातिरिक्तं ज्ञानं जायतामित्यादी
च्छाया उत्पादासंभवात् आदीति प्रत्यक्षाद्यनंतरमित्यप्रत्यक्षादिरूपसिद्ध्यनंतरमित्यर्थः अनुमित्युत्पादेच्छेनितया
वानुमितित्वप्रकारकत्वनिवेशाधिक्यमपव्यप्रमेवतादृशेच्छा नाम संग्रह प्रसंगादिति भावः इदमुपलक्षणं अनु
मितित्वप्रकारकत्वनिवेशेपि यदानुमितिर्जायतामितीच्छाकाले सिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृत
साध्यादिविषयकत्वप्रकारकत्वनिवेशेनमावश्यकं न च प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशानमा
वश्यकं न च प्रकृतसाध्यादिविषयिण्यानुमितिः तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसंभव इति वा
च्यं दर्शितेच्छाया अपि च यदायनुमितित्वेन वह्न्यादिगोचरसमूहालंबनविषयकत्वात् न चानुमितित्वप्र
कारत्वानिवेशे च अनुमितिरेव यत्र प्रत्यक्षत्वादिनेच्छाविषयस्तत्रानुमित्यापत्तिः इष्टत्वात् अनुमितौ प्रत्य
क्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात् तस्या अनुमितित्वप्रकारकेच्छासमशीलत्वात् इति हृदयं न चानु
मितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्नेः प्रत्यक्षतः सिद्धौ पाकरूपसामग्र्यां च सत्यां प्रत्यक्षातिरिक्तं ज्ञानं जाय
तामितीच्छासत्त्वेऽनुमित्यापत्तिः तत्र पक्षतासत्त्वेपि अनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकपाकसामग्र्याः
प्रतिबंधकत्वादेवानुमितिवारणसंभवात् अथासिद्धिदशायां पर्वते वह्नेरेतत्सिद्धिदत्यत ज्ञानं जायतामितीच्छासत्त्वेऽनु
मित्यापत्तिः तस्या अपि अनुमितिविषयकत्वात् न चेष्टापत्तिः तदुत्तरं पर्वतो वह्निमानित्यादिमानसोत्पत्त्यापि इच्छाविषय
सिद्धेः तादृशेच्छायाः किंचिज्ज्ञोचरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात् न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूप

गदा॰ प्रतिबंधकसत्वात्तादृशानुमितित्वस्यासिद्धिरिति वाच्यं प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टं यत्तत्सामग्रीरूपप्रतिबंधकसत्वात् यावत्पर्व
मानसमान्यानुमितिप्रतिबंधकत्वात् अन्यथासिद्धिशून्यकालेपि तादृशेच्छासत्वे अनुमित्युत्पादप्रसंगात् नचोक्तपर्वतव
ह्निविधेयकत्वावच्छिन्नत्वनिवेशस्यावश्यकतया वह्निप्रकारकत्वावगाहिद्वेषितेच्छावलादनुमितिप्रसंगः तद्विधेयकत्वा
वच्छिन्नत्वनिवेशस्यावश्यकतया वह्निप्रकारकत्वावगाहिद्वेषितेच्छावलादनुमितिप्रसंगः तद्विधेयकत्वावगाहीच्छाद्वेषा
९ पांच जायत एवानुमितिः विधेयतायाः प्रत्यक्षे ऽप्रामाणिकतया तत्प्रकारकेच्छाया अनुमितित्वस्यैव विषयसिद्धेरिति वाच्यं वि
धेयतायाः प्रत्यक्षव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वप्रकारिकायाः अपि इच्छायाः प्रत्यक्षसिद्धिकाले संभवात् प्रत्यक्षा
न्यत्वप्रकारकेच्छापर्यंतानुधावनस्य सर्वोधितित्वात्ते निर्वीजत्वात् नच विधेयता प्रत्यक्षव्यावृत्तैव तदवगाहित्वस्य तु चनायव
व्यपदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यं एवमपि वक्ष्यमाणस्य पक्षस्य सिद्धिकाले अपक्षे ज्ञानं जायतामिती
च्छावत्वेन अनुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य संगमयितुमशक्यत्वात् सदृशेच्छायाः प्रत्यक्षव्यावृत्तविधे
यताद्यवगाहित्वे प्रत्यक्षसामग्रीकालेपि तद्बलादनुमित्यौचित्यात् तदनवगाहित्वे सिद्धावप्यनुत्तेजकत्वात् अथो
च्यते अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां अनुमितिविषयकेच्छात्वेनैव अनुगमः पर्वते वह्निरेतदन्य
तज्ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्यां चानुमितेर्वारणाय तथाविधेच्छा
व्यक्तीनां तत्तत् व्यक्तित्वेन प्रतिबंधकताकल्पनमिति न दोषः नच तासां तत्तद्व्यक्तित्वेन अनंतप्रतिबंधकताकल्पन
मपेक्ष्य अनुमितित्वादिरूपप्रकारविशेषमंतर्भाव्येव अनुमित्सानां सत्वे जकत्वमुचितमिति वाच्यं तथासति पर्वते वह्नि
ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतमानविशेषवद्यनुमितीच्छाविशिष्टतत्सामग्रीसत्वे सिद्धौ सत्यां वह्न्यनुमित्युपप
त्तये तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकतापत्या तदभावसहकृतस्य पक्षतयोर्विशेषणविशेष्यभावे विनिगमनावि

रहेण सिद्धिप्रतिबंधकतानंत्यप्रसंगात् ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छायाः उपादाने प
क्षोद्देश्यकत्वावच्छिन्न साध्यविधेयकत्वप्रकारकेच्छायाः असंग्रहः एवंविधयान्तु परज्ञानानुमितिविषयिण्या अनुमिति
र्जायतामितीच्छाया अपि निरुक्तरूपेणासंग्रहः नच साऽसंग्राह्यैव असिद्धसाध्यानुमितिसामान्यासत्त्वा
त्तद्बलादपि सिद्धप्रकृतसाध्यानुमिते स्तदिच्छाविषयसिध्यनुरोधेनावश्यकत्वादित्यत आह यादृशयादृशेति
असत्त्वासिद्धौ यत्किंचित् गोचरं ज्ञानं जायतामित्यादीच्छासत्त्वेऽनुमित्युत्पादेऽन्नासांचानुत्तेजकत्वात् सिद्धौ सत्यामि
ति तदिच्छाभावसमुदायस्येति साध्यविशेषविशिष्टपक्षविशेष्यकवह्निवृत्तित्वप्रकारकेच्छानां च तत्तद्वृत्तित्वप्रका
रकानुमितिगोचरेच्छात्वेनानुगम्य एवैकाभावानिवेशपक्षे तथाविधानामनुमितिर्जायतां प्रत्यक्षमन्यज्ज्ञानं जायतामित्याका
रकेच्छानांतु यद्व्यक्तिसत्त्वे सिद्धिनदसत्त्वेऽनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीयाः अन्यथाऽतिप्रसंगात्
तत्कालीनसिद्धिभेदा एव वा एतेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाभावनिवेशमादाय विनिगमनाविरहोऽति
रहोऽतिरस्तः सामानाधिकरण्यसंबंधेन तद्वत्ताभाववैशिष्ट्यनिवेशापेक्षया न तत्सिद्धिभेदानां विशेषणताविशेषसंब
धेनैव वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसंबंधानिवेशे च लाघवात् सिद्ध्युत्तरं तथाविधेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्त
दृच्छासामग्र्या अनुमितिविरोधित्वादेव न संभवतीति ध्येयं इदंत्ववधेयं तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वे सिद्धौ विशे
षणत्वं · किंतु तत्तद्भाववत्त्वेनैव युगपत्तावदभावानां तथात्वे तावदभावमात्रविषयकधीविषयकधीविषयत्वरूप
स्य तावत्समुदायत्वस्य तादृशरूपेण निवेशे तावदभावानां तत्तदभाववत्त्वेनैव निवेशनीयतया तत्तदभावत्वेन तत्तदभाववैशिष्ट्य
निवेशापेक्षया महागौरवात् तादृशधायत्किंचिद्धियः तद्व्यक्तित्वेन निवेशे तथाविधधीसहस्रस्य विनिगमनाविरहेण निवे
११३ शप्रसंगात् किंतु तत्तदभावविशिष्टत्वेन सिद्धेरेव निवेशनमुचितं यदि च सियो विशेष्यविशेषणभावानापत्तेस्तुना नाविशे

षणेष्वव्याप्यवृत्त्यकमवच्छेदकत्वे सिद्धान्तविरुद्धमिति मन्यते तेन तद्व्यापकाभावविशेषितापराभावस्यावच्छेदकत्वमुपेयं तत्र च
विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः एतत्तदभाववत्तावदभावमात्रविषयकधीविषयत्वेन निवेशपक्षेऽपि ता-
नेतत्तदभावविषयितानामेकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहस्यावश्यक-
त्वादिति इच्छायाश्चाननुगमेऽपि एकरूपेण स्वानुमितिहेतुताउपपत्तिः तावदभावविशिष्टसिद्ध्यभावस्यानुगतत्वादिति भावः
इदं पुनरत्रालोचनीयं वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायतामित्याकारकेच्छानामपि तत्साध्यविशिष्टतत्पक्षतावगा-
हित्वप्रकारकतया पर्वते वह्नेः सिद्धिकाले महानसपक्षकानुमिति सामग्र्यामसत्यां तादृशेच्छाबलात् पर्वते वह्न्यनुमि-
त्यापत्तिः अनुमितत्वांशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यतरत्किंचिद्विषयकत्वाप्रकारकत्वविशेषणस्य इच्छायां निवेशे व-
ह्निविशिष्टं पर्वतं महानसं चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असंग्रहप्रसंगः वह्निविशिष्टपर्वतविषयिणी महान-
सविषयकानुमितिर्भिन्नानुमितिर्जायतामित्याद्याकारकेच्छाबलादुपदर्शितस्थले अतिप्रसंगस्य अशक्यवारणता चेति इच्छाविष-
यतावच्छेदकतायाः पर्याप्तिनिवेशनमावश्यकं तथा च वह्निविशिष्टपर्वतानुमितिर्भवत्वित्यादीच्छायाः तत्साध्यविशिष्टतत्प-
क्षविषयकानुमितित्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैव उत्तेजकत्वपर्यवसितं अनुमितित्वानन्तर्भावेन तादृशेच्छायाः तत्सा-
ध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविषयतावच्छेदकताकत्वाभावेन अशक्यसंग्रहत्वात् एवं च अनुमितित्वमत्यन्ता-
न्यत्तानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण संग्रहाभिधानमसंगतं न च तत्कल्पपरित्यागेनैव यादृशयादृशेत्याद्य-
भिधानं इत्युक्त्या अनुमितित्वमत्यन्तान्यत्तानत्वप्रकारकेच्छानां पृथक् पृथक् अभावनिवेशनमेवाभिमतमिति वाच्यं एवं तरत्वव-
कव्याकोपाश्रयभावात् अथानुमितित्वमत्यन्तान्यत्तानत्वादिप्रकारकेच्छानामननुगम एव संभवति तथाहि तत्साध्यवि-
शि — — शिष्टतत्पक्षविषयकानुमितित्वपर्याप्तावच्छेदकताकत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्व-

ताद्दशधर्मघटकपक्षसमानावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वनिष्ठावच्छेदकताभि
न्नावच्छेदकतानिरूपकत्वं विषयताकत्वमेव पर्यवसितं एवं च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रत्यक्षान्यज्ञा
नत्वनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकविषयताकेच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छाना
मप्युत्तेजकत्वापत्त्या निरुक्तधर्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञा
नत्वादिप्रकारकेच्छानामपि संग्रहः संभवति नच वह्निविशिष्टपर्वतविषयकं जायतामित्याकारकेच्छायास्सि
षाधयिषासंस्कारो नत्वेवं च वितार्क्यावारणाय विषयतायामनुमितित्वावच्छिन्नत्वविशेषणस्यावश्यकतया न तत्सं
ग्रह इति वाच्यं समवायेन किंचिदवच्छिन्नत्वं निवेश्य धर्मितावच्छेदकावच्छिन्नविशेषणतया यत्ताद्दशविशिष्टविषयक
त्वनिष्ठमवच्छेदकत्वं तदेव भेदप्रतियोगितायां निवेश्यवाताद्दशेच्छावारणसंभवात् इति चेन्न हि पक्षतांशे साध्यावगाहित्वे
नानुमितिविषयकेच्छानां उक्तानुरूपसमशीलरूपं तरेणोत्तेजकत्वापत्त्या ताद्दशावच्छेदकतायामेव पक्षतांशे साध्या
वगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतां तावतैव तत्संग्रहस्यापि संभवात् इच्छायामननुगमाभिधानासंगतिः न
च विषयतायां साध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्वनिवेशतमावश्यकं अन्यथा अन्यानुमितिसामग्रीसमवहि
तानामनुमितिर्जायतामित्याद्याकारकविषयविशेषानपरत्वानुमितीच्छानां वारणासंभवादिति अन्यानुमितिसाम
ग्र्यसमवहितताद्दशेच्छानां तत्तद्व्यक्तित्वे नैव उत्तेजकत्वस्य उपगंतव्यतया उत्तेजकाननुगमाभिधानसंगतिरिति वाच्यं
ताद्दशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतयैवातिप्रसंगवारणसंभवेन तासां वारणानौचित्यात् साध्यविशिष्टपक्षावगा
हित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य दर्शितसामग्र्यसमवहिततत्तद्याविधेच्छानां तत्तद्व्यक्तित्वेनोत्ते
जकताकल्पने तत्तदिच्छाभावानां विशेषणविशेष्यभावविनिगमनाविरहेण गौरवात् अन्यानुमितिसामग्र्या विशेषणविशे

ग.स. ग्रीकालीनतद्दृशेच्छानां प्रतिबंधकत्वेन तत्तत्कालीनवायुसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबंधकताप्रसंगवत्
तादृशसामग्रीभावकालीनतथाविधेच्छानामुत्तेजकताया मते विनिगमनाविरहेण तत्तदिच्छाकालीनसंयोगविशेषाणामुत्ते
जकताप्रसंगस्य दुर्वारत्वात् अथवा उक्तानुगतरूपेणोत्तेजकभूताया मिच्छाया मनुमितिर्जायतामित्याद्याकारका
न्यानुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदा एव निवेशनीयाः न त्वत्तासामनुमितिप्रतिबंधकत्वमिति तत्तदिच्छाभेदनि
वेशस्थाने तत्कालीनवायुसंयोगभेदनिवेशेनोपपत्तिः इच्छानां तत्तद्भेदस्याव्यावर्तकत्वात् नत्संयोगाभावानां वैशिष्ट्यनि
वेशे च तादृशवैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्संबंधेन इच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात् अत्रा
हुः उक्तसकलेच्छानां निरुक्तरूपेणानुगमेपि पक्षतालक्षणे नेतरलक्षण अनुमितिर्भवत्वित्याकारकेच्छानामेव निरुक्तेन रूपेण
संग्रहात् तत्तद्व्यक्तित्वेन पृथगभावा निवेशनीयाः तादृशलक्षणघटितत्वाय अवच्छेदकताभेदस्योक्तावच्छेदकतायां निवेशपतत्सं
ग्रहे कालांतरेपि तथाविधेच्छाबलादनुमित्यापत्तेः कालांतरेऽनुमित्सुत्वतया च तादृशानुमित्साया विषयासिद्धेरिष्टापत्य
योगादिति अननुगमाभिधानसंगतिः न चैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयित्वप्रकारकत्वविशेषणस्या
भिधानस्यासंगतिर्दुर्वारैवेति वाच्यं अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयत्वाद्यन्यप्रकारकत्वानवच्छि
न्नत्वनिवेशपरत्वात्पर्यावस्तुतः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकं अन्यथा किंचि
त्ज्ञानं जायतां पर्वतः किंचित्गोचरं ज्ञानं जायतामित्यादीच्छावारणासंभवात् नत्संहेतादृशानां सर्वासामिच्छानां तत्तत्
व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् अनुमितिर्जायतामित्यादीच्छानां च पृथगनुमितित्वादिपर्याप्तविषयतावच्छेद
कताकेच्छात्वेनैवद्युत्तेजकता अन्यानुमितिसामग्रीसमवहितपक्षेच्छानां च तत्तद्व्यक्तित्वेन प्रतिबंधकत्वमेवेति
सर्वं समंजसं ननु धूमेन पर्वते वह्निमनुमिनोमीत्याकारकेच्छाबलाद्धर्मादि लिंगकानुमित्युत्पत्त्यात्तत्साधारणरूपे

णैवसिषाधयिषाया असिद्धावुत्तेजकतया अवश्यकत्वात् तन्मात्रे सिद्धिकाले सत्यपि धूमपरामर्शे आलोकादिप
रामर्शादनुमित्यापत्तिः परन्तु तादृशत्वादित्यत आह धूमेनेति॰ भिन्नलिंगकेच्छासत्त्वे सिद्धिदशामात्रपक्षत
नानुमितिस्तत्तादृशेच्छायाः प्रतिबंधकत्वेन संभवतीत्यत आह असत्यामपि सिद्धाविति तन्नन्वानुमितेः सद्दि
तया यदीतितदैतिनलिंगकानुमितावितिशेषः अन्यमात्रेति तदन्यमात्रलिंगकत्वप्रकारकासिद्धीच्छेत्यर्थः
धूमलिंगकानुमितिरालोकलिंगकानुमितिश्च जायतामित्याद्याकारकसमूहालंबनेच्छाकाले आलोकादिपरा
मर्शादनुमित्युपपत्तये मात्रेति तदन्यमात्रलिंगकत्वप्रकारकत्वं च तल्लिंगकत्वाप्रकारकत्वे सति किंचिल्लिंगकत्वप्रकारक
त्वं च तल्लिंगकत्वप्रकारतानिरूपिततत्त्वाधाविशेष्यतात्त्वविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वं अतः
आलोकेन धनं धूमेन तु वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिंगकवस्याद्यनुमितेर्नापत्तिः आलोकलिं
गकत्वप्रकारकताशरीरे च वास्तवालोकादिप्रकारतानानिवेशनीया किंत्वालोकत्वाद्यवच्छिन्नाप्रकारतैव अन्य
थाआलोकत्वादिना धूमत्वादिना वा धूमादिकमालोकादिकं चावगाहमानयोरिच्छयोरालोकलिंगकानुमित्यादौ प्र
तिबंधकत्वतदभावयोरापत्तेः इत्येणानुमिनुयामित्यादीच्छाया आलोकादिलिंगकानुमित्यविरोधित्वोपपत्तये आलो
कत्वाद्यवच्छिन्नत्वस्थले आलोकाद्यवृत्तित्वेन ज्ञायमानधर्मावच्छिन्नत्वमेव निवेश्यम् द्रव्यत्वादेरालोकत्वादिविर
हत्वभ्रमदशायां तादृशेच्छायाविरोधित्वापत्तिरालोकत्वादेरालोकाद्यवृत्तित्वज्ञानशून्यकालीनायाः आ
लोकेनानुमिनुयामित्यादीच्छाया अविरोधित्वोपपत्तये च वालवालोकाद्यवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्य चो
पेक्षणं धूमत्वादेरालोकाद्यवृत्तित्वज्ञानदशायामेव तल्लिंगकानुमित्यापत्तेः उक्तरालोकालिंगकानुमितिविरोधित्वं ना
न्यदा तेरतिपरास्त वस्तुतस्तु द्रव्यं नालोक इत्यादिज्ञानशून्यकालीनानामालोकोद्रव्यमित्यादिज्ञानकालीनानां चेच्छानां

तत्तद्व्यक्तित्वेन भेदकूटएव स्वात्तंत्र्येण प्रतिबंधकतावच्छेदकेऽनुप्रवेशनीयः तेनोक्तवल्ह्येकालांतरीणाप्रहणांतरीणज्ञानया
रणायत्वसामानकालीनत्व स्व समानाधिकरणयोर्ज्ञानविशेषणताघोव्ये आलोकेद्रव्यमित्यादि तत्तस्थानीयज्ञानविशि
ष्टत्वे वालोकोनद्रव्यमित्यादि ज्ञानविषय विशिष्ट भेदे द्रव्यत्वादिमल्लिंगकत्वप्रकारकेच्छाया अनुगमय्य वा तद्वद्वत्ता हे
शप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः भेदस्य कालिकाव्याप्यवृत्तित्वोपगमात्तताहशज्ञानशून्यकालीनानां द्रव्येना
नुमिनुयामीत्यादीच्छानां विशिष्टभिन्नतया प्रतिबंधकतोपपत्तिः सामानाधिकरण्यसंबंधेन वैशिष्ट्यनिवेशात् ग्रहणरूपां
तरीणज्ञानादिकमादाय दोषः द्रव्यत्वावच्छिन्ने नानुमिनुयामीत्याद्याकारिकानां द्रव्यत्वांशे लिंगतावच्छेदकत्वावगाहीच्छानां
तु न द्रव्यत्वादि यद्विषयक परामर्शजन्यत्व तद्रूप द्रव्यत्वादिमल्लिंगकत्व प्रकारकत्वं विषयतायामेव तत्र द्रव्यत्वाद्यवच्छिन्न
त्वभानात् लिंगांशे द्रव्यत्वानवगाहनात् अतस्तथाविधेच्छानामालोकत्वाद्यवच्छिन्नलिंगकानुमितिविरोधित्वमन्यत्र
मेव आलोकत्वाद्यवच्छिन्ने नानुमिनुयामीत्यादीच्छानां ताहशानुमित्यादीच्छानां ताहशानुमित्यविरोधित्वोपपत्तये चालोक
त्ववल्लिंगकत्वाद्यप्रकारकत्ववदालोकत्वाद्यवच्छिन्नलिंगकत्वाद्यप्रकारकत्वमपि आलोकत्वाद्यवच्छिन्नानुमितिप्र
तिबंधकतायां निवेशनीयं पर्वतेवह्निमनुमिनुयामीत्याद्याकारकलिंगविशेषजन्यत्वानवगाहीच्छानामविरोधित्वोपपत्त
ये किंचिल्लिंगकत्वप्रकारत्वनिवेशनं तदर्थः किंचिल्लिंगकत्वप्रकारत्वानि रूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वा
वच्छिन्नाविषयिताकत्वं अतो धूमेनेंधनमनुमिनुयामीत्याद्याकारकेच्छानां नालोकादिलिंगकवह्न्याद्यनुमितिविरोधित्वमित्यर्थः
तावेधेयं यालोकालिंगकधूमलिंगकानुमितिर्जायतामित्याद्याकारकेच्छाकाले केवलालोकादिलिंगकपरामर्शो
दनुमितिर्न जायते तथाविधानुमितेस्ताहशेच्छायाः अविषयत्वात् उभयादिलिंगकानुमितेरेव तद्विषयत्वात् एवं धूमलिंग
वह्न्यनुमितिरालोकालिंगकवह्निघटोभयानुमितिर्जायतामितीच्छाकाले घटाद्यनुमितिसामग्र्यसत्त्वमालोकपरा

मर्शादनुमितिर्न जायते घटाद्यविषयकानुमितेस्सत्त्वात्तादृशेच्छाविषयासिद्धेरतस्तथाविधेच्छानां तत्र तत्र प्रतिबं-
धकतानिर्वाहाय तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपि-
तविशेष्यताशून्यत्वमेव तल्लिंगकत्वाप्रकारकेत्वेत्यनेन विवक्षणीयं अत्र स्थले चालोकलिंगकवह्न्यनुमितित्वा-
दिप्रकारतानिरूपितविशेष्यतातादृशप्रकारतातिरिक्तं धूमलिंगकत्वादिप्रकारतानिरूपितविशेष्यतातादृशप्रकारता-
तिरिक्तं धूमलिंगकत्वादिप्रकारतानिरूपितैव समूहालंबन एव प्रकारतानाभेदेन विशेष्यताभेदादन्यथा समूहालंबने-
च्छानस्तादृशेच्छायावैलक्षण्यानुपपत्तिः तथाच तादृशेच्छानां तथाविधप्रकारत्वानिरूपितविशेष्यताशून्यत्वेन-
प्रतिबंधकत्वनिर्वाहः आलोकेनानुमितिर्जायतां धूमेन च पर्वते वह्निमनुमिनुयामीत्याद्याकारकसमूहालंबनेच्छानां
तादृशविशेष्यताशून्यत्वविरहेऽपि आलोकलिंगकानुमितिसामग्रीकालीनतथाविधेच्छानां तत्तद्व्यक्तित्वेन पृथक् प्रति-
बंधकत्वोपगमान्न तादृशानुमितिसामग्रीदशायां तादृशेच्छावलादालोकलिंगकानुमित्यापत्तिः पर्वते वह्निमनुमिनुयां
धूमेन च पर्वते वह्निमनुमिनुयामीत्याकारकसमूहालंबनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनुमितिर्भवत्येव एवं
धूमेनानुमिनुयामित्याद्याकारकविषयविशेषानुपरक्तानुमितीच्छानां किंचिल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षवि-
षयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताकत्वमेव विशेष्यदलेन विवक्षणीयं धूमेन च घटम-
नुमिनुयामि प्रतीच्छावद्धूमेन वह्निं घटं चोभयमनुमिनुयामीत्यादीच्छायामपि आलोकलिंगकवह्न्याद्यनुमित्यवि-
रोधित्वमिष्टमेव सिद्धौ च तादृशेच्छायामनुत्तेजकतया सिद्धिकाले तादृशेच्छावलादसत्यामालोकलिंगकानुमितीच्छा-
यां न तादृशानुमितिरिति पर्वते वह्निमनुमिनुयामीति लिंगविशेषानुपरक्तानुमितीच्छानां विशेषणदलविरहान्न विरोधित्वमि-
ति दिक् व्यापकलिंगकेच्छाकालीनोभयलिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणप्रकारस्तु पुनरग्रे प्रदर्शयिष्यते तेनत्रस्व

गदा॰

13

विषयेसजातीयज्ञानेच्छायाविरोधित्वमप्रष्टव्यमित्यतआह · कामिनीजिज्ञासादिवदिति · यथाका
मिनीप्रत्यक्षादिगोचरीच्छाचशाब्दविषयकप्रत्यक्षादिप्रतिबंधिकानयेत्यर्थः पृथक्प्रतिबंधकेतिप्र
त्तानासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः ॥ तथाचोक्तस्थलेपक्षतासत्वेपिलिंगनि
विरहान्नानुमितिरिष्टमेवेतिभावः नन्वकामिनीजिज्ञासास्थलेकामिनीभिन्नविषयज्ञानान्तुत्पादस्य सर्वानुभव
सिद्धतयानचतस्याः प्रतिबंधकत्वमस्तुसिद्धसत्वेधूमादिलिंगकानुमितीच्छादशायांआलोकलिंगक
वह्न्यनुमित्यनुत्पादस्तुनानुभविकः तथासतितुल्ययुक्त्याघटाद्यनुमित्साप्रत्यक्षादिगोचरीच्छादशा
यामपितदनुत्पादस्यतथात्वप्रसंगः नह्येकमपिविशेषमीक्षामहे इत्यभिसंधायोक्तापत्तिवारणाय
कल्प्यान्तरमनुसरतियदिवेतितथाचान्यलिंगकानुमितीच्छायाः प्रतिबंधकत्वमसंभावितमेवेतिभावः
तत्रैवेतिअन्यलिंगकानुमितीच्छास्थलइत्यर्थः तल्लिंगकानुमितीच्छातल्लिंगकत्वप्रकारतानि
रूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वावच्छिन्नविशेष्यताकेच्छावाच्यासि
बाधयितुपदेनविवक्षणीयेत्यर्थः ॥ नन्वेवंलिंगविशेषानुपदर्शनानुमि
तीच्छाकालेसिद्धौसत्यामनुमित्यनुपपत्तिरित्यतआह · तदभ्य
मान्नेतिधूमे ·:·

नालोकेन च वह्निमनुमिनुयामीत्यादिसमूहालंबनेच्छाकाले आलोकादिलिंगकानुमित्युपपत्तये मात्रेति तथा च तल्लिं
गकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाप्रकारिका सती या किंचिल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयका
नुमितित्वादिप्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारिकेत्यर्थः लिंगविशेषोप
रक्तानुमितीच्छासंग्रहाय सत्यंतं आलोकेनैव नमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्याकारकेच्छाबलादा
लोकलिंगकवन्ह्यनुमित्यापत्तिवारणाय तत्र साध्यादिनिवेशः लिंगविशेषानुपरक्तानुमितीच्छाकाले पर्व
ते वह्निमनुमिनुयां धूमेनैव नमनुमिनुयामीत्याकारकसमूहालंबनेच्छाकाले आलोकादिलिंगकवन्ह्य
नुमित्युपपत्तये न हि विशेषदलं घटितं किंविच्छावत्तानैव जायतामित्यादौ व्यावारणाय च परमदलं यद्यप्यालोकधूमोभय
लिंगकवन्हिविशिष्टपर्वतविषयकानुमितिर्जायतां आलोकेन वन्हिर्घटोभयविशिष्टपक्षविषयकानुमितिर्धूमे
न वन्हिविशिष्टपर्वतविषयकानुमितिर्जायतामित्यादौ व्यावारणाय तत्र लिंगकत्वतत्साध्यविशिष्टतत्पक्षवि
षयकानुमिति त्वादिप्रकारताभिन्नप्रकारतानिरूपितविशेष्यताकान्यत्वमेव संपत्तदेनेनाविचदणीयं तथा च लि
गविशेषानुपरक्तानुमितीच्छायां नादृशविशेष्यताकान्यत्वविरहात् किंचिल्लिंगकत्वादिप्रकारकत्वनिवेशनम
मफलमेवेति तथाविधविशेष्यताशालित्वेनैवेच्छायां उत्तेजकत्वमुचितं तथापि तादृशविशेष्यताशालीच्छाया
मेव न तदन्यमात्रेत्यादिग्रंथस्य तात्पर्यमिति विशेषं स्वीकृत्य दिशा आवश्यकं नन्वेवं धूमालोकादिलिंगकानुमि
तिसाधारणैकपक्षताया असंभवस्त्वनेष्टापत्तिमाह लिंगविशेषेणापीति लिंगभेदेनापि पक्षत्वं भिन्नमेवेत्य
र्थः अपि साध्यादिभेदसमुच्चायकः तन्मते धर्मो नेष्टापत्तितात्पर्यं तथा च साध्यादिभेदेनेव लिंगभेदेनापि पक्षताभेदो
न च क्षतिकर इति भावः नन्वेवं लिंगभेदेन पक्षताया अननुगमात्तस्याव्यभिचारेणानुमितिरूपानुगतकार्ये हेतुत्वा
त्वासंभवः न च तत्तत्साध्यकत्वादिवत्तत्तल्लिंगकत्वस्यापि कार्यतावच्छेदकनिवेशान्न व्यभिचार इति वाच्यं ताव
तापि आलोकादिलिंगकानुमितीच्छाधीनधूमालोकोभयादिविषयकसमूहालंबनपरामर्शजन्यानुमितौ धूमा
दिलिंगकानुमितीच्छाविरहविशिष्टसिद्ध्यभावव्यभिचारस्य दुर्वारत्वात् नादृशानुमितावपि धूमादिलिंगकपराम

१ ग०

र्यजन्यत्वरूपधूमलिंगत्वस्याक्षतत्वात्‌ नचपक्षधूमलिंगकानुमितीच्छायाउत्तेजकतानत्वालोकलिंगकानुमितीच्छानाम
पितन्नलिंगकपरामर्शविशिष्टानामुत्तेजकत्वोपगमात्तत्रस्थलेव्यभिचारइतिवाच्यं तथासतितत्रधूमलिंगकेच्छाया
अपिधूमलिंगकापरामर्शविशिष्टायाएवइतिवाच्यंपरवेच्छोत्तेजकत्वेविन्यात्‌ सर्वसाधारणैकपदस्तनायापवहवच
नयालिंगविशेषणपीतिर्थ्यासंगतेरितिचेन्नधूमलिंगकेच्छाविरहविशिष्टान्यानुमितित्वमेवतादृशसिद्धिविशि
ष्टत्वंवस्तुसामानाधिकरण्यावच्छिन्नसाध्यवह्नितानतौन्यत्रिकत्वसंबंधेनउक्तासिद्धिविशिष्टत्वंवस्तुसमानाधि
करणावच्छिन्नसाध्यवह्नितोनरेण्यत्रिकत्वसंबंधेनउक्तसमूहालंबनस्थलीयानुमितिस्तुनाथाविधसिद्धिविशि
ष्टेतिनतत्रव्यभिचारः सिद्धिकालेऽसत्यांलिंगकसिषाधयिषायांउक्तस्थलपवनधूमपरामर्शोत्तरमनुमित्यापत्तिः १
धूमादिलिंगकेच्छाविरहविशिष्टासिद्ध्यभावादिपरामर्शादिघटितकारणतामस्त्ववकार्यान्यत्रिप्रयोजकत्वोपगमात्‌
समूहालंबनस्थलेऽालोकपरामर्शघटितसामग्र्युत्पन्नकार्यान्यत्रिनिर्वाहात्‌ अथाव्यवहितोत्तरत्वंप्रवर्पत्तौयत्क्षणसाध्य
क्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेनिसाधिकरणकालध्वंसाधिकरणत्वरूपंवाच्यमन्यथायत्क्षणेसिध्या
त्मकधूमालोकोभयलिंगकपरामर्शधूमलिंगकेच्छानुमितेर्यत्क्षणानुमितिस्तत्सत्त्वाधिकरणक्षणस्यालोकलिंगकेच्छा
विरहविशिष्टसिद्ध्यधिकरणक्षणध्वंसाधिकरणत्वेनतदन्यत्रिकानुमितेरुक्तसंबंधेनतादृशासिद्धिविशिष्टान्यत्वात्‌ ता
दृशासिद्ध्यभावस्यव्यभिचारतादवस्थ्यात्‌ एवंचयत्क्षणेसिध्यात्मकधूमपरामर्शोधूमलिंगकेच्छानुमितेर्धूमलिंगकेच्छाविर
हविशिष्टासिद्धिविशिष्टत्वेनपक्षताकार्यत्वानुपपत्तिरितिचेन्नतादृशासिद्धिविशिष्टत्वस्याधिकरणक्षणध्वंसासत्त्वाधिकरणक्षणो
न्यत्रिकत्वसंबंधेनवाच्यं उक्तसमूहालंबनस्थलेवधूमलिंगकेच्छाक्षणस्यालोकलिंगकेच्छाविरहविशिष्टसिध्यधिकरणत्वा
दृशात्क्षणध्वंसासमधिकरणक्षणान्यत्रिकत्वमनुमितेरितिनव्यभिचारः एवंसिध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिंगके
करणमध्यमक्षणध्वंसासत्त्वाधिकरणक्षणसतिकत्वाभावात्‌ पक्षताकार्यत्वनिर्वाहः अथवासाध्यवद्भिन्नष ॥ १॥

14



१४

र्वकालावच्छिन्नतादृग्लिंगकव्याप्तिविरहविशिष्टसिद्ध्यभावाधिकरणताविशिष्टसमवायेन तादृशसिद्ध्यभावकार्य
तावच्छेदकसंबंध इति न कोपि दोषः अथवा स्वरूपतिरूपतिमत्वस्वरूपत्रिप्रागभावाप्रतियोगित्वस्वसमानाधिका
रणेन त्रितय संबंधेन तादृशसिद्धिविशिष्टान्यत्वं तादृशसिद्ध्यभावजन्यतावच्छेदकमिति न कोपि दोषः अथ
वा तादृशसिद्धिविशिष्टत्वं स्वाधिकरणक्षणावच्छिन्नध्वंसाधिकरणक्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वसं
बंधेन वाच्यं उक्तसमूहालंबनेन च तादृशसिद्ध्यधिकरणक्षणोत्पत्त्यवच्छिन्नध्वंसाधिकरणक्षणमनुमितिस्तन्नित्यं तत्क्ष
णएवेति न तद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वसंबंधेन वाच्यं उक्तसमूहालंबनेन च तादृशसिद्ध्यधिकरणक्ष
णत्वावच्छिन्नध्वंसाधिकरणमनुमितिस्तन्नित्यं तत्क्षणपदे तन्निध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्य
भिचारः सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिंगकव्याप्तिविरहविशिष्टसिद्ध्यधिकरणक्षणत्वावच्छिन्न
ध्वंसाधिकरणद्वितीयक्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वविरहात् न हि शिष्टसिद्धिविशिष्टान्यत्वं व्याहतमिति एवं
यत्र धूमपरामर्शानन्तरं तदप्रामाण्यावगाहि आलोकपरामर्शस्तदनन्तरं मनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशि
शिष्टधूमपरामर्शविशिष्टत्वरूपाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शजन्यत्वावच्छेदकाक्रान्तत्वाद्व्याप्तिहीन एव तद
प्रामाण्यज्ञानाभावविशिष्टपरामर्शसत्वेन प्रसक्तस्य व्यभिचारस्य तादृशपर्वतोऽभिधेयवारणमवसेयं लिंगोपधा
यमतेऽत्र न कदाचिदप्यनुपपत्तिः तन्मते धूमविशिष्टपर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्यनुमितित्वादेरेव धूमलिंग
कव्याप्तिविरहविशिष्टसिद्ध्यभावादिजन्यतावच्छेदकत्वात् उक्तसमूहालंबनस्थले चालोकवान्पर्वतो वह्निमानित्याका
रकानुमितेरेवोपगमेन व्यभिचारानवकाशादिति धूमेनानुमिनोम्यालोकेनानुमिनोमीत्यादि सकलजनसा
धारणानुभवसिद्धाया विषयतासिद्धानुमितेनैकत्वं तथा च धूमालोकादिलिंगकत्वविलक्षणानुमितित्वसाधारणैकैकव प
त्वनुमितिस्थले तत्प्रसंगभंगाय प्रतिबंधकांतरमेव कल्पनीयमित्याशयेनाह । तल्लिंगकेति । असत्यां सिद्धौ वह्न्यादिलिंगका
नुमितौ सत्यां सत्वेऽनुमित्युत्पत्तेः सिद्धिकालीनेति समानाधिकरणसंबंधेन सिद्धिविशिष्टस्यार्थः समूहालंबनेच्छाकाले
सिद्धिसत्वेऽनुमित्युत्पत्त्ययेन तल्लिंगकानुमितौ व्याप्तिविरहाविशिष्टेति धूमलिंगकात्वादिप्रकारतानामप्रकारत्वानि तदवच्छिन्नवि
शेष्यताकव्याप्तिविरहविशिष्टत्वार्थकेन न धूमालोकोभयलिंगकवह्न्यनुमितिजनकेनामिन्यायाकारकेच्छाचलाभिसिद्धिः।

२ श. कालेनकेवलालोकलिंगकानुमितिप्रसंगः नचाप्रसंगआलोकेनवन्हिचेदभ्याऽनुमितिर्धूमेनवन्ह्यनुमितिर्निर्णीयतामिति
नाहृशेच्छाकालेसिद्धिसत्वेकेवलालोकादिपरामर्षात् केवलवन्ह्याद्यनुमित्यापत्तिः यद्यपितादृशप्रकारत्वानिरूपित
विशेष्यताकान्यत्वस्यइच्छाविशेषणत्वोपगमएवसमूहालंबनेच्छास्थलेऽनुमितिर्नुपपादयितुंशक्यते तथापिता
नेच्छायायोगपद्यमंगीकृत्यैतानवीनानांमतेयत्सिध्यतिकिंतत्शक्यतेलेशमलिंगकानुमितीच्छायास्तद्धितीयप्रदर्शेचालो
कलिंगकानुमितीच्छायाउत्पादस्तत्रालोलिंगकानुमितीच्छायाउत्पादस्तत्रालोकलिंगकानुमित्युपपत्तेस्तादृशवि
शेष्यताशालीच्छाविरहविशिष्टत्वपर्यंतानुधावनंविशेषानुपरक्तानुमितीच्छानामपिनिरुक्तैनेजकताच्छेदकाक्रां
ततयातादृशेच्छायाः प्रतिबंधकत्वाप्रसक्तेः अन्यलिंगकेतिस्वयानायातेसिद्धिविशिष्टेच्छामात्रस्यप्रतिबंधकत्वेसिद्धिवि
शिष्टपरतत्वमित्यादिगौरवेच्छाकालेनानुगतेच्छाव्यक्तीनांतत्त्वादिकत्वेनाभावानांनिवेशनीयतयामहागौरवमि
तितत्साध्यविशितत्वसविषयकत्वप्रकारत्वमितीच्छात्वेनैवविशेषोपहितेच्छानिवेशनेबोध्यं वस्तुतस्तत्तत् सा
ध्यविशिष्टतत् पक्षविषयकत्वादिप्रकारकत्वमप्यन्यलिंगकानुमितीच्छायांननिवेशनीयंयदादेच्छाकालीनान
नुगतेच्छानांभवन्मतेऽपिसिद्धिप्रतिबंधकतायाःवक्तव्यतयासाम्यात्मन्मतेतत्तच्छदादीच्छासाधारणरूपेणैवानुमित्सायाः
उत्तेजकतायमगात् नहृक्तस्थलेपक्षतानिर्वाहेनैतादृशानानुगतेच्छानामन्यलिंगकेच्छायामेवोत्तेजकत्वात् अथैवंता
दृशानुरूपधर्मावच्छिन्नाभावस्यलिंगभेदेनानेककारणतानापत्त्याकारणतानारस्यचकल्पनामयोत्यालिंगभेदेननत्वालिं
गकानुमितीच्छाविरहविशिष्टसिद्धत्वरूपलक्षणधर्मावच्छिन्नाभावहेतुताकल्पनस्यैवसम्यक्तयावाकारोऽभिर
स्तुचनायेतिवदंतिपरेतन्नअन्यलिंगकत्वप्रकारकानुमानानुमितीच्छासमवहितासिद्धिप्रमायामनुगतानुमित्सायाअ
न्यलिंगकानुमित्युपपत्तयेसिद्धेतादृशेच्छाभावकूटवैशिष्ट्यनिवेशनतत्वमतेगौरवमेतन्मतेवान्यलिंगकानुगतानुमित्सै
क्यरूपोत्तेजकबलादेवतत्रानुमित्युपपत्तेः सिद्धेतादृशाभावानिवेशनात् नचैतन्मतेप्यन्यालिंग ॥ ॥

कानुमित्साप्रतिबंधकतायामेव तासां पृथ्वेनैकात्वस्यावश्यकतया साध्यमितिवाच्यं येनोयेनोययानतुगतासाध्यानुमि
त्सात्मकसमूहालंबनरूपाएव अन्यालिंगकानुमितिनोत्का: नयान्यलिंगकानुमित्सायां नाहृपेक्षाव्यक्तिभेदाएव निवी
र्पानीया: सिद्धान्तसामानाधिकरण्यसंबंधेन नवत्वेनाभाव: न च वन्हिकालीनसंयोगादिव्यक्ताभावानां निवे
शमात्रायविनिगमनाविरहेन गौरवं न च त्वंमनेपि न व्याप्तिसिद्धिव्यक्तिभेदाएव सिद्धौ निवेशनीय: मनुनदिच्छाभावाद्य
तिन विनिगमनाविरहावकाशइतिवाच्यं सिद्धेरनंतत्वेयत्रनाहृपासमूहालंबनेव्याप्यत्रीनाशत्वाविलक्षतनाहृपासिद्धि
भेदानां सिद्धौ निवेशइत्याद्याद्यत्रिकालेनुमित्यायत्रेतानेवयोर्धर्मेणपरस्पराटमतेरव्यासामन्यानानाविशेषितत्वपाद
शस्यैव सिद्धिजननकाले प्रतिबंधकोन्नेनेकव्ययोरेकस्याप्युपरमकेषु ननु तद्वैशिष्ट्यालिंगलवाहिनीयत्वेनानुमित्साप
पत्रयेष्टत्वंनेपि न व्याप्तिसिद्धिभेदाअन्यलिंगकेच्छाविषयत्वेन सिद्धौ निवेशनेन न त्वन्यलिंगकेच्छाविषयत्वेनेति विशेषण
सिद्धावानरिच्छात्वेनाभाव: एतेनानेनकालीनसंयोगादिव्यक्त्यभावनिवेशापेक्षयाविनिगमनाविरहप्रसंगइत्यादु: ।
साधकमानयदृष्टसिद्धिकारणपरत्वेष्टवैजात्यदोषप्रसंगात् नच्याचवेष्टसाधर्म्येतिसाध्यवत्वनिष्ठत्व: प्रकृतसाध्यप
र्ववैशिष्ट्यावगाहिनिष्ठत्व: पाषाणमयोवन्हिमान्पर्वतेनस्तेनसौरस्याघ्याकारकसमानप्रकारकनिष्ठघटपर्वतोप
र्वतोवन्हिमानित्याद्याकारकानुमितेरनुभवसिद्धत्वात्तयाष्यत्वेनवतनुपपत्ते: प्रकारकविशेष्यनिवेशापत्ति पाषा
णमयत्वादिनेति न च पर्वतेनस्ववन्हेर्धर्मित्वसाध्यत्वयोरुद्देश्यत्वविधेयत्वबोध: अनुप्रवेशनीयविन्यस्यपरत्वनाश
रीरित्यादि: नच्याचपर्वतत्वाद्यवच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालित्व
निष्ठत्वावच्छिन्नस्यसिषाधयिषाविरहविशिष्टस्याभावो हेतुरितिपर्वतवासितं पर्वतोवन्हिमानित्यादिसिद्धदशायां वन्हि
मान्पर्वतोघटवानित्याद्यनुमित्सुदयानिवयत्तावच्छेदके प्रकारताद्युपेत्य विधेयतानिवेशनं विधेयताववन्हिमत्

ग.

मितौ मीत्याद्युक्तसाध्यनियामकपक्षतावच्छेदकत्वाद्युक्तो विशेषः स्वरूपतः तत्त्वं वह्नित्वादिप्रकारकसिद्धिदशायां जाति
मान् वह्निमान् पर्वतो जातिमद्वान् इत्याद्यनुमित्युत्पादात्तत्र पर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां प्रथमविशेषणस्य एवं
तो वह्निमान् पर्वतः इत्येव वह्निमान् इत्याद्यनुमितेरुत्पत्तेश्च प्रतिबध्यादिशि पर्वतत्वाद्यवच्छिन्नत्वादिना किंचिद्विशेषिते पर्वत
त्वादिपर्यायसावच्छेदकतानाकत्वमेव विवक्षणीयं तदर्थः पर्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वं
पर्वतो वह्निमान् इत्यनुमितेर्जातिमान् वह्निमान् पर्वतो जातिमद्वान् इत्यादिसिद्धेः प्रतिबंधकत्वाप्रतिबंधकदिशः पर्वतत्वा
द्यवच्छिन्नत्वादिना किंचिद्विशेषितेन तदवच्छिन्नत्वमेव विवक्षणीयं तदर्थश्च निरवच्छिन्नतद्भूत्यवच्छेदकतानाकत्वमिति ध्ये
येन च पर्वतत्वावच्छिन्नविशेष्यतानाकानुमितौ पर्वतत्वावच्छिन्नविशेष्यताकसिद्धेः प्रतिबंधकत्वं पर्वतेन विशेष्यकसिद्धिदशा
यां तेन रूपेणानुमितेर्न इष्यत एवेत्याशयं हृदि कृत्वाह यदि चेति पर्वतत्वांशेऽवच्छेदकत्वानवगाहिप्रतीति विषयत्वं कि वि
शेष्यकसिद्धिदशायां तेन रूपेण पक्षतेऽनुमित्युत्पादस्यानिर्विवादत्वात्सामानाधिकरण्येनेति प्रकृतपक्षस्य
मितिजनकत्वमित्यत्र विशेषणाभावादेव विशिष्टाभावनिर्वाहात् धर्मिविशेषणनिवेशनमफलमतो विनाप्यनुमि
त्यनुमितिः अन्यथा तद्धर्मिणां धर्मिविशेषानंतरभावेपि पक्षमात्रवृत्त्या सामानाधिकरण्येन सिद्धिदशायामव
च्छेदकावच्छेदेनानुमितौ बाधकाभावान्नातिप्रसंगो नि सामानाधिकरण्यमात्रावगाहीत्यर्थः धर्मिविशेषो पीत्विन्यथा च प
र्वतत्वाद्यवच्छिन्नतत्पर्वतादिपक्षकानुमितौ पर्वतत्वादिवच्छिन्नतत्पर्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबंधक
त्वकल्पनमिति भावः अन्यथा तत्तत्तान्तानुमितेः प्रत्यनुमितेरनुभविकत्वविरहेन धर्मिविशेषाणां निवेशनमिति अत्र
मितिरिति विधाय पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रावगाहित्वे न तेषां स्वच्छेदकभागावगाहित्वे च अवच्छेद्या
वच्छेदकभावोपि तद्विषयस्वरूपसंबंधविशेषः यथा मूलावच्छिन्नो वृक्षः संयोगीत्यादौ मूलादिसंयोगयोः अवच्छेद्यावच्छे
दकस्य पूर्ववत्तान्तर्गतविशिष्टव्याप्यव्यापकभावः यथा पृथिवीत्वेन पृथिवीत्वादौ पृथिवीत्वादि रूपाद्या अवच्छेदकावच्छे

देनानुमितिस्तु पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिसिद्धिदशायामपि जायते तन्मूलविषयकसिद्धिदशायामधिकवि
षयकानुमितेः सर्वानुभवसिद्धत्वात् अतएव यत्रावच्छेदकावच्छेदेनानुमितिर्हेतुज्ञानाद्यसिद्धस्य पक्षे दोषत्वं तत्र तदेवोपपादयति
पक्षतावच्छेदकस्येति सामानाधिकरण्येन सामानाधिकरण्यमात्रेण न तु अवच्छेदेन पक्षतावच्छेदकावच्छेदेन सिद्धिः वसि
द्धेः एवं सामानाधिकरण्यमात्रावगाहिसिद्धेः प्रतिबंधकत्वमेवकारव्यवच्छेद्यं अयंभावः पर्वतो वह्निमानित्यादि
सिद्धिदशायां पर्वतः सदेव वह्निमानित्याद्याकारकानुमितेरुत्पत्त्या विधेयतावच्छेदकतायाः पर्याप्तिः प्रतिबध्यता
वच्छेदककोटौ निवेशनीया एवं संयोगादिना वह्नेः सिद्धावपि संयत्र संयोगादिना वह्नेस्तु सिद्धावपि संयत्र संयो
गादिना वह्न्यनुमित्या संसर्गतावच्छेदकतायामपि पर्याप्तिर्निवेशनीया एवं चावच्छेदेनानुमितेस्तु उद्वह्नित्वा
दौ शुद्धसंयोगत्वादावपि विधेयतावच्छेदकतायाः संसर्गतावच्छेदकतायां वाऽपर्याप्तत्वात् सानुमितेर्न सामानाधिकरण्यमा
त्रावगाहिसिद्धिप्रतिबध्यत्वमिति अंवच्छिन्नव्यापकतायाः संसर्गतया भाने मानाभावात् पक्षतावच्छेदकांशे तत्तयावच्छिन्नवि
षयकानुमितिरेव पक्षतावच्छेदकावच्छेदेनानुमितिः पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सिद्धिसामान्यप्रति
बध्यतावच्छेदककोटौ निवेशनीयं न च विषयभेदेन विषयताभेदात् पक्षतावच्छेदेनानुमितेर्विषयतामपि प्रवेश्यकं
नानाव्यक्तिपक्षकस्थले पक्षतावच्छेदकव्यापकत्वमिमेव तन्निष्ठपक्षतावच्छेदकव्यापकोद्देश्यतायाः अप्रसिद्धिरिति वा
च्यं उद्देश्यतासंबंधेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमेन निर्वाह इति वदंति दीधिति
कारस्य तु अवच्छेदकावच्छेदेनानुमितेरवच्छेदकावच्छेदकमावृत्तित्वरूपसंबंधरूपस्यैव विद्वत्व्याप्यव्यापकभा
वरूपस्यापि भानमेवानुमतेरवच्छेदकत्वयोर्वस्तुनोभेदादित्यत्र वक्ष्यमाणत्वात् अव्यापकत्वभानस्य न वनमप
नत्वपर्वतत्वसामानाधिकरण्येनैकत्रैव व्यक्तरसाध्यसिद्धाविप्यनेनैवावच्छेदकावच्छेदेन साध्यसिद्धिरवत्ताभावलाभे
न हानिः प्रयोजकत्वात् सामानाधिकरण्येनानुपादानस्यानर्थकत्वाद्वैयर्थ्यं नैवेतदेव मते प्राचीनमतेऽपि उक्तयुक्त्याऽवि

ग॰ धेयतावच्छेदकत्वपर्याप्तिमिमेवेति चेन्न अस्मदुक्तावच्छेदकत्वान् नाहेतोदेश्यतावच्छेदकत्वान्यत्वस्याधिकस्य निवेशनीयतया गौर
वात् सिद्धिसामान्यशून्यतादशायामवच्छेदकावच्छेदेनानुमितानुद्भवमानानां सिद्धिभाववलात्तत्कार्यतावच्छेदकी
भूतपक्षतावच्छेदकव्यापकान्यानुमितित्वावच्छिन्नस्यापत्तेश्च प्रसक्तत्वे एव सिद्धिसामान्याभावकालीनायामवच्छेदका
वच्छेदेनानुमितौ विशिष्टवह्नित्वे विशिष्टसंयोगेनावयवांशे विषयता विशेषदद्वह्नित्वेष्टसंयोगेनापर्यामावित्व
यता विशेषासौ क्रियते पक्षतानेनैकविषयेविषयतावदुपगमेत्यितिविरहात् इति सिद्धिसामान्याभावकार्यतावच्छे
दकावच्छिन्नान्यत्रिविशेषेव न चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाश्च संसर्गतया भानोपगमेनाहृत्यानुमितावच्छेद
कावच्छेदेन हेतुमत्ताज्ञानस्य हेतुकारणतानाकल्पनेनैव पक्षतायाधिकात्तदेशपक्षकानुमितौ तत्पर्यवेन विशेष्यकपरामर्श
स्य हेतुतया परत्वसाधेवयावत्पर्यवेन विषयकपरामर्शस्यापि धानुमितेः यदानानुमानुमितौ परामर्शस्य हेतुत्वा
कल्पनात् व्यापकतायाः संसर्गविधयाभानस्य तु विवक्षत्वस्योपगमादिति वाच्यं यैकाव परामर्शः कतिपयपर्यवेन विषयकः
प्रत्यक्षेत दितरयावत्पर्यवेन विषयकस्तथापवच्छेदकावच्छेदेनानुमितेस्त्यादायेनेन वहाप्तेः अवच्छेदकावच्छेदेन हेतुमत्ता
ज्ञानं विनावच्छेदकावच्छेदेनानुमित्यनुत्पादस्य सर्वसिद्धत्वात् तवैवकस्यापि परामर्शस्य भवन्मते सिद्धायामवच्छेदकावच्छे
देन हेतुमत्तावगाहितायोग्यसंभवात् एवं पक्षतावच्छेदकतावच्छेदकसंबंधेन पक्षतावच्छेदकव्यापकत्वसंबंधेन पक्षता
वच्छेदकावच्छेदेनानुमित्याघ्येयाच्छेदकभावरूपाधिकविषयानवगाहने समानाधिकरणपमात्रेण सिद्धिदशायां सिद्धि
विषयीभूतकतिपयपर्यवेनादिविषयकानुमितेरनुत्पादौ वित्यात् अथ प्राचीनैरनुमित्युपयोगिनः सिद्धसाधन
स्य दोषत्वमुपेयते अत एवैतैः शब्दानित्यत्वाद्यनुमाने धन्या दाविष्यनः निन्यसाधनवारणाय वर्णात्मकत्वादि विशेषणं
निवेशितं न चांशतः साध्यसिद्धावप्यकर्थमिविषयतयाया यावत्पर्यवेनादिविषयकानुमित्युत्पादउचितः अधिकधर्मिविष दी॰
यिकानुमितेः सिद्धिदशायामुत्पादे वाग निन्त्यत्वादि सिद्धिदशायां मनित्यो वाद्य इत्यादि समूहालंबनानुमित्युत्पादस्यावि

॥ ॥ स्यात् वह्नित्वघटस्याप्यनुमितिः नवीनैरपि पक्षतावच्छेदकैकदेशांशतः सिद्धसाधनस्य दोषतोपगमात् एवं च नम
तपक्षतावच्छेदकावच्छिन्नत्वावगाहि तद्धर्मावगाहि भ्रमं मितिभेदेन पक्षताभेदस्य स्वीकरणीयतया गौरवं न च विशिष्ट
हेतुधर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहित्वाद् एतद्दशायां तत्सामा
नाधिकरण्येनानाहार्यबाधविषयधर्मिविषयकानुमितिपक्षधर्मिविशेष्यकानुमितेरिव सकलधर्मिविषयकानुमिते
रप्युत्पादो चिन्त्यः स्ववच्छेदकावच्छेदेनानुमितौ तु हेतुसाध्ययोः समविश्रमस्तो वा यस्य दोषतानापत्तेरिति वाच्यं सामानाधि
करण्यमात्रावगाहित्वाद्विशिष्टहेतुसामानाधिकरण्यविषयकत्वेन तथाविधविपरीतनिश्चयप्रतिबन्धकतायामनुम
नुपगमे तस्याः श्रमस्तो वा यस्य दोषतानापत्तेः एवं च सकलपक्षानामेकपरामर्शविषयतासम्भवे तु परामर्शाद्धेतुविषयता
वच्छेदकावच्छेदेनानुमितिः प्राचीनमते च स्ववच्छेदकावच्छेदेनानुमितौ नाहार्यपरामर्शस्य हेतुत्वाकल्पनेऽपि
न मते लाघवं च मे पक्षतावच्छेदकावच्छेदेन विशिष्टहेतुव्यापकत्वभानानुपगमेऽपि योग्यतया पक्षतावच्छेदेन लाघवस्त्रि
त्वादि निश्चयस्य च हेतुगोधत्वाद्यवच्छेदेन निश्चयस्यापि न योनलक्षणे च त्वादौ गोधत्वादि सामानाधिकरण्य
मात्रेण नलक्षणत्वादि संशयविरोधिताप्रसङ्गात् उभयोरेव निश्चययोर्गोधत्वाश्रययावद्धर्मिणि ग्राह्याभावावगाहि
तया विशेषात् विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटौ बाधितकभानस्य विरोधितायां तत्त्वाभावात्
द्वितीयस्य विरोधित्वं प्रथमस्यापि न स्यात् तौल्यात् नन्वनयोरुभयनिश्चयविषयव्यापकतयोर्भेदेन विशेषसम्भवा
त् एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वभानापेक्षया लाघवात् यावद्धर्मिवृत्तित्वैककविषयत्वेन सिद्धिसामान्य प्र
तिबन्धतावच्छेदिका सिद्धिसामान्याभावकालीनानुमितौ च नाहार्यैकैकधर्मिमात्रवृत्तिविषयतामपेक्ष्य नह्य
तिपरास्तः पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धिद्वयस्यापि सामानाधिकरण्यमात्रावगाहित्वमनुमि
तिनैवायनेनोभयोरेव सिद्ध्योः पक्षतावच्छेदकव्यापकसाध्यसंबन्धस्यानुभयसामानाधिकरण्यावगाहितया नाहार्यत्वेऽ

ग.

नेत्यत्र निरुक्तानवगाहित्वात् । एतन्मतस्याविधेयानुमितेः प्रत्यक्षादिसिद्धेरेव प्रतिबंधकत्वं दर्शयति तत्सामानाधिकरण्येनेतिना
त्सामानाधिकरण्यमात्रेण पक्षतावच्छेदकसामानाधिकरण्यमात्रेण स्वावच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्या-
वगाहित्वं स्वावच्छेदांशे मात्रपदेन स्वावच्छेद्यावच्छेदकभावानवगाहित्वं वा न सिद्ध्यभावमन्यतावच्छेदककोटौ निवेशनीयं उक्त-
दिशा प्रयोजनासंभवात् । पर्याप्तिनिवेशादेवोपपत्तेरेव यथोक्तावच्छेदकं सिद्धेर्मात्रपदेनेति मात्रपदेऽकृत्वार्थकं न त्यावपक्षता-
वच्छेदकसमानाधिकरणेन तदवच्छेदेन च तत्सिद्धेरित्यर्थः प्रतिबंधकताघटकविषयसिद्ध्योः संसर्गत्वादीनां पर्याप्तिमति
वेशेण कद्रूपेणोभयसाधारणं निश्चयत्वं व्यापकतेनिवेश्य अन्यथानुक्तः पृथक् पृथगेव निवेश्यं तत्सामानाधिकरण्ये-
नानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धेश्चाहत्य रूपेण प्रतिबंधकतापि तदवच्छेदकावच्छेदेन सिद्धेर्न प्रतिबंधक-
ताधिकं स्वावच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबंधकत्वे कल्प्ये स्वावच्छिन्नसंयोगादिपर्याप्त्यसंसर्गेनावकत्वस्य प्रतिबंध-
तावच्छेदकेऽवश्यं निवेशनीयतया स्वावच्छिन्नत्वादिघटितधर्मेणावच्छिन्नसंयोगादिनिष्ठसंसर्गताकत्वस्यावश्यं वक्तव्यत्वेन स्वघ-
टितसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृश्याः प्रतिबंधकत्वेनैवोपपत्तेरिति । नदस्तत्सामानाधिकरण्येनानुमितौ तथा-
मवच्छेदकावच्छेदेनानुमितौ च मिथ्याकारकत्वाना तादृश्यकपृथक्त्वेन कल्पनायाः वत्समानानतया तादृश्यकप्रतिबंधकता-
कल्पस्य स्यावश्यकत्वान्नेतत्तादृशासिद्धेरन्याया पक्षतावच्छेदकावच्छेदेनानुमिति जीयतामिथ्याकारकसिद्धेः धायो-
ग्यत्वेऽस्मति वावच्छेदकावच्छेदेन हेतुमत्तावगाहमध्यसमानाधिकरण्यमात्रावगाहिपरामर्शात्तादृशानुमितेरापत्तिः
तथाविधसिद्धाय धिया समत्वेन पक्षतापाश्रयत्वादित्यतश्चाह । इत्यपि चेति इत्यं चेत्युक्तरूपपक्षतावच्छेदकावच्छिन्न-
तत्सामानाधिकरण्यमात्रावगाह्यनुमित्याः सिद्धेः पृथक्प्रतिबंधकत्वे चेत्यर्थः । लिंगभेदन्याय इति यथा तत्र लिंगका-
नुमितौ सिद्धेः प्रतिबंधकतायां तल्लिंगकानुमितीच्छोत्तेजिकानन्तर्भाव्यलिंगकानुमितीच्छापि न स्यात् पक्षतावच्छेदकसामाना-
धिकरण्यमात्रावगाहिन्यामनुमितौ प्रतिबंधकतायां तादृशानुमितीच्छोत्तेजिकानन्तर्भाव्यविधयानुमितीच्छानिवेशक ॐ.

18

एतेषामिति नातिप्रसंग इत्यर्थः । यद्यपि पर्वतो वह्निरित्याद्याकारकसाध्यनिश्चयानन्तरं पर्वतो वह्निमानित्याद्याकारानु
मितिर्जायते तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धेरेव प्रतिबन्धकत्वेऽपि सामान्यतः साध्यपक्षवैशिष्ट्या
वगाह्यनुमितौ नाहार्यासिद्धिरित्यनेनैव प्रतिबन्धकत्वं वक्तव्यमिति चेत् अपि तु विशिष्ट्यैव प्रतिबन्धकमस्तु द्वयं प्रागल्भ्या गौरवस्या
दोषत्वादित्याशयवानाह । साध्यविशेष्यकेति हेत्वाद्यः सामान्यविषयकत्वविशेष्यविशेषणभाववैपरीत्यमात्रं
विलक्षणं सम्भवति प्रायेण निर्भरस्तु वनायसामानाधिकरण्ये सत्वे पक्षविशेष्यकेवेतित यावद्विशेष्यप्रकारकतावि
शिष्टेन विशेष्यप्रतिबध्यप्रतिबन्धकभावः कल्पनीय इति भावः । न च तादृशानुमितिभावस्य प्रामाणिकत्वे तस्य
यविषयतानवच्छेदकधर्मवत्वसाध्यवैशिष्ट्यावगाहिनिश्चयत्वस्यानतिप्रसक्तस्य सत्वघटितत्वमुभयविषयसिद्धौ रत्नगत
रूपेणैव प्रतिबध्यतावच्छेदकं तत्पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेव न तत्तत्तन्तनया सर्वविशेष्यकसा
ध्यप्रकारकानुमितित्वं तथा साध्यविशेष्यकपक्षप्रकारकानुमितित्वं तथा मिथ्याकारिकारिकावारिकाराः इह
करणात्तादात्म्यत्वात् । एवं च साध्यविशेष्यकसिद्धेरनन्तरं पक्षविशेष्यकसिद्धेरेव पक्षविशेष्यकानुमित्यभा
वः प्रामाणिकत्वे च तत्पक्षया यादि निपपत्यमानादित्यस्य हेतुः सामानाकारकसिद्धेरिति । अन्वहनाकासिन्य इत्यर्थः
पर्वतः स्वदेशवह्निमानित्यादिसिद्धिदशायामपि स्वेनैव विषयतः पर्वतो वह्निमानित्याद्यनुमित्युत्पादादधिकवि
षयसिद्धेः शविशेषित्वेऽवच्छेदकावच्छेदेन सिद्धेः सामानाधिकरण्येनानुमितौ प्रतिबन्धकतानालोचनस्य संगतेः । एवं
ज्ञानविशेषविवादेनोक्तत्वेन गौरवमितिवानुमाने सिद्धसाधनात्र सम्भवतीति । अविशिष्टहेतुता विशिष्टसाध्यसाधन
एव सिद्धसाधनतानवकाशकानन्तविशिष्टानाविशिष्टसाधने पीति ज्ञातसाध्यविशिष्टमानपदिमादिष्यसिद्धसाध्यो
पस्थावानासिद्धि पर्वतो वह्निमानित्याद्याकारिकायाः पक्षानुमितेरेवाभावात् । किं तु प्रसिद्धसाध्यकस्थलविशेष
तानादितिविरहात् । तां प्रति साध्यपक्षवैशिष्ट्यावगाहित्वानन्त्वेनाभयविषयसिद्धिसाधारण्येनापि प्रतिबन्धक
त्वं सम्भवतीत्यभिप्रेत्य मतान्तरमाह । तादृशानुमितिमिति साध्यविषयविशेष्यकानुमितिमित्यर्थः । सिद्धिमात्रं पक्षविशे
ष्यकसाध्यविशेष्यकावच्छिन्नसिद्धिरित्यर्थः । न तु उक्तं केवलसाध्यत्तानदशायामपि साध्यविशेष्यकानुमितिरप्रामाणि

८ प.

केनचत्साध्यविशेषणताकानुमितेरेव संभवादित्यत आह अनुमितिप्रतिबंधकत्वाद्युपपत्त्यादिविषयताया: सिद्धाघटितविष

यिरहस्यानिरूपितत्वस्य च निवेशानंगीकारे गौरवापत्त्यभिप्रायेणाह प्रसाध्यप्रसिद्धिरिति साध्यतावच्छेदकप्रकारक

ज्ञानमित्यर्थः नेनेतरत्वव्यापकीभूताभावप्रतियोगितावच्छेदकीभूतत्वपृथिवीत्वादिपरामर्शाभेदत्वादिना सा

ध्यज्ञानसत्त्वेपि पृथिव्यामितरभेदइत्याकारकानुमितेर्नानुपपत्तिः नवतत्र पृथिवीसाधारणेतरभिन्नेत्येता

दृशानुमितेः संभवाविशेषणताावच्छेदकीभूतेतरभेदत्वादिप्रकारकज्ञानविरहात् अथैतरभेदत्वादिप्र

कारकज्ञानस्य यदीतरभेदत्वादिविच्छिन्नमुख्यविशेष्यकज्ञानत्वं प्रतिबध्यतावच्छेदकं तदा तत्र द्यावियताम

दृशाया मितरभेदादिपदितप्रमेयत्वाद्यनुमितेरपि अनुपपत्तिः तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवे

शेपि तत्र इतरभेदः प्रमेयः पृथिवीतरभिन्नत्वादिसमूहालंबनानुमितेर्नोत्त्वाभावादानित्यादित्वमितेस्तत्रानुपपत्तिः

अत्र केचित् पृथिवीतरभिन्नत्वादिसाध्यविशेषणताकानुमितौ नयावियंश्वेतरादिसाध्यविशेषणतावच्छेदकता

भिन्नाकारत्वेन विधेयतासाध्यविशेष्यकानुमिताव तत्रान्यतयाव प्रकारताभिन्नविधेयतेन साध्यप्रसिद्धिः प्रतिब

ध्यतावच्छेदकेनानुपपत्तिरित्याहुः तत्प्रकारकत्वाविशेष्यत्वाविधेयताव्यापकमाजलभेदेन मामिदंइत्याकार

कनेतरभेदादिसाध्यकतादृशानुमितिरपि तद्विधेयकत्वानुपपत्तेः यदि च यादृशधर्मत्वसाध्यतावच्छेदकं सं

तत्र विधेयत्वमतिरिक्तमित्युच्यते तदा नत्वं च यजलभेदादिसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालित्वा

साध्यप्रसिद्ध्यभावव्यभिचारेण तद्रूपेण वस्तुतस्तु तद्धर्मावच्छिन्नप्रकारकत्वेन तद्धर्मावच्छिन्नविधेयकानुमि

तित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं साध्यप्रसिद्धिस्थले च साध्यप्रकारितैवानुमितिर्जायते तेनानु

मानं तत्प्रकारिकेति न तत्र व्यभिचारः अत एव साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव प्रसिद्धसा

ध्यकस्थले भावरूपसाध्यप्रसिद्धिस्थले न त्वभावसाध्यकस्थले इत्यर्थः न च परामर्शस्यानियमतः साध्यव

दितिव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रति ॥ ॥ ॥ शे.

वेधकतायाः कल्पयितुमशक्यत्वात् तथा उपष्टम्भकासंगतेः स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्या
प्त्यधिकरणत्वरूपविधेयतावच्छेदकत्वान्तर्भावप्रत्यासत्त्याऽनुमितिं प्रति विषयतानवच्छेदकतासंबंधेन ज्ञानस्य संबंधाधारणेन प्रतिबंधक
तायाश्चाप्यनन्तरोक्तसंभवापि साध्याद्यघटितव्यतिरेकव्याप्तिविषयकपरामर्शाघटितसामग्र्या एव साध्यविशेष्यकानुमित्यनुत्पादप्रयोजक
तायाः सत्त्वात् तदभावसाध्यकस्थलेऽपि विशेष्यकानुमितेः साध्यविशेष्यकत्वेन तादृशप्रतिबंधकतायाः प्रयोजकत्वादुपष्टम्भासंगतेस्तादव
स्थ्यात् यत्र यत्र महानसीयवह्निमात्रविषयकः परामर्शस्तत्र पर्वतधर्मितावलात्पर्वते पर्वतीयवह्निर्भासमाने विशेषणज्ञानविरहेणावि
शेष्यतयैव भासत इति भावः साध्यस्थलेऽपि साध्यविशेष्यकानुमितिसंभव इति तत्र व्याप्तिसामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसी
यवह्निविषयकपरामर्शे पर्वतीयवह्नावप्रयोजकस्य कुलभत्वात् न च सर्वत्रात्मकपरामर्शकदाचिदुद्बोधकविरहेण तदभावसंभवात् उ
द्बोधकस्य फलबलकल्प्यत्वात् विशिष्टविशेषणकबुद्धौ विशेषणज्ञानहेतुताया नैयायिकानामवच्छेदकप्रकारत्वान
स्यवाच्यतात्वत् पर्वतीयवह्न्यविषयकपरामर्शादपि वह्नित्वेन तद्वह्निविशेषणकानुमितिसिद्धेश्च। इदमत्रावधेयं साध्यप्रसिद्धेः प्र
तिबंधकतायामपि साध्य विशेष्यकानुमितित्वप्रकारकेच्छया उत्तेजकत्वमावश्यकं अन्यथा पक्षविशेष्यकसिद्धिदशायां तादृशेच्छा
सत्वे साध्यविशेष्यकानुमितेरपलापापत्तेः; सिषाधयिषाविरहविशिष्टसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः संभवेन तत्पर्वतो वह्निम
संशयति इत्यादि संभवे साध्यविशेष्यकानुमित्यनुपगमोपपन्नतातिकरहतिरोधायैव साध्यप्रदर्शायां साध्यविशेषणकानुमितेः सं
भवेन तत्पर्वतो वह्निमसंशयति इत्यादिसंभवे साध्यविशेष्यकानुमित्यनुपगमोपपन्नतातिकरहतिभिसंधायैव साध्यप्रसिद्धेस्तद्धेतो
थित्वस्वीकारे तेषां साध्यविशेषणकानुमितित्वादिसंभवेन तादृशानुमित्यपलापनौचित्यात् तथा च यत्रासिद्ध
समवाहितसाध्यप्रसिद्धिरेव वानुमितिः तत्र व्यतिरेकिपरामर्शात् साध्यविशेष्यकानुमितिर्न हि शेषं आपातकानुमितिः पद्ये
ननस्यकेवलान्वयिपरामर्शे हेतुहेत्वादिहिथानुमितिरनुभवानुभविकीनत्वाद्व्यतिरेकिपरामर्शात् साध्यप्रसिद्धिदशा
याम् अपि साध्यविशेष्यिकाया उपगतानुमितेः स्वीकारः सम्भवतः सिद्धिप्रतिबंधकतापत्त्या मामा साध्यप्रसिद्धेः त्र प्र

गदा.

प्रतिबंधकतायामवच्छेदकतायावमप्याकिंचित्वं रसेव व्याप्तिकिपरामर्शस्य चित्साध्यविशेषणकानुमितिस्वीकारेणादृष्टा
नुमितिप्रतिव्यतिरेकिलिंगकत्वात् विधिकारकानुमितित्वदृष्यशतेन कोश्ययोगसिद्धेः प्रतिबंधकताद्वयेनैव गौरवात् परेतु प्र
प्रसिद्धसाध्यवास्थलेपि साध्यविशेषणकानुमितिर्जायतेऽनुभवेत्याद्युपविषयतावच्छेदकप्रकारकत्वानविर
द्वेपि विशेष्यविशेषणत्वेनैव विशेषणानुमितिन्यायेनैव द्रष्टव्योऽनुभवेत्याद्युमितिर्भवात् नवालावबानव
काशः नादृष्टानुमितित्प्रत्येवसाध्यप्रसिद्धिप्रतिबंधकतायामावश्यकत्वनीयत्वादिति वाच्यं तथाविधानुमितो
याहृशोविषयतानस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमितिसाधारणोपायमात्रसाध्यविशेष्यका
नुमितानुपगमे साध्यप्रसिद्धिप्रतिबंधकतायाएवाकल्पनात् नच सिद्धिकाले तथाविधानुमितेर्वारणाय तत्रासिद्धेः
साध्यप्रसिद्धेर्वा प्रतिबंधकत्वनावश्यकमिति वाच्यं विशिष्टावगाह्यनुमितिस्थलीयसिद्धिप्रतिबंधकतये
वोपपत्तेः उक्तभेदत्वादिनेतरभेदादिविधेयकानुमितेन्व्यतस्थलीयप्रतिबध्यतावच्छेदकस्योभयसाधारण
त्वादिति यत्नवाविशिष्टवैशिष्ट्यावगाह्यनुमितौ विशिष्टावगाहिनी सिद्धिरेवा विरोधिनी नत्वकेवलं साध्यविशेषणम
त्यादिवेत्याज्ञावमाणोपिमानथानस्याम समर्गो विशिष्टानित्रयायेनत्वानवगाहिनयानतोविषयकत्वात् एवंच के
वलेविशेष्यविशेषणमितिन्यायेनानुमितेप्रामहृष्ट्यासिद्धेः हृष्टायां तस्या वारणोपत्तया तत्रतादृशसिद्धेर्विरोधित्वक
ल्पनाधिकामावश्यकमेवेति किमर्थमुक्तं साध्यविशेष्यकानुमितिविकारेणानन्तस्वीकारविशिष्टवैशिष्ट्या नवगा
हिसाध्यविशेषणकानुमितेरनभ्युपगमेन प्रतिबंधकभावसाम्यादिति तदापि तद्विशिष्टनिरूपितवैशिष्ट्य
भानमात्रविरोधिबाधादिकालीनकेवलविशेष्यविशेषणमितिन्यायेनानुमितेः सर्वसंमततया तत्रतादृशसिद्धेः
प्रतिबंधकतायामावश्यकत्वेन रसाध्यविशेष्यकानुमिति स्वीकर्तव्येपि कप्रतिबंधकताबाज्ञ्यनस्पष्टवारत्वादित्ति ३०

पर्वतीयत्वस्य यत्नाद्विशिष्टविशेष्यकज्ञानस्य तत्तात्पर्यविशिष्टविशेष्यकज्ञानहेतुत्वे साध्यतावच्छेदकावच्छिन्नविशे
ष्यकानुमितित्वस्य प्रसिद्धसाध्यकस्थले संभवात् तत्तद्विशेष्यकज्ञानस्य विशिष्टबुद्धौ हेतुत्वे तथा तद्विशेषणस्य पक्षतावि
शेषहेतुत्वेतिवाच्यं सामान्यप्रत्यासत्तिजन्यज्ञानविशेष्यकव्यभिचारात् सामान्यहेतुत्वासंभवापत्तेस्तद्रूपोभयविशेषण
वगाहितानस्यावच्छेदकविशिष्टस्य प्रवृत्तिविशेषणकत्वावारणार्थं विशेषणेत्वमात्रावगाहकत्वात् अन्यथा विशेषणज्ञान
स्यापि विशेषबुद्धिहेतुत्वापादकत्वात् अतएव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधं प्रति स्वावच्छेदकार्थज्ञानाधेयत्वान्न च
स्याद्विशेष्यकानीतत्वरूपयोरेवपक्षतावच्छेदकत्वे साध्यविशेषप्रकारकज्ञानत्वेन विशिष्टबोधः पक्षसत्तानिर्व
चनाविशेषसाध्यज्ञानापेक्षेतिवाच्यं निर्विशेष्यतावच्छेदकानुमितेरसंभवितत्वात् अतएव नित्यधर्मितावच्छेदक
स्याप्रसिद्धत्वात् साध्यमिकाभावप्रत्यक्षे प्रतियोगिविषयकत्वाभावादविशेषणेन व्याप्तत्वोपपत्तेः तथा च साध्यवि
शेष्यकानुमितेर्निरूपकत्वे चेतिवदति अथ जलव्यापकीभूताभावप्रतियोगि पार्थिवत्ववती पृथिवीत्यादिपरा
मर्शाद्दर्शदिद्रूपविशेषणज्ञानेन विनास्वरूपतः सत्प्रकारिकाया एव तत्तद्भेदरूपाकारिकानुमितेरेवकार्यत्वय
नतिवेत्त्व यथा विशेषज्ञलोयत्वमात्रप्रकारकाभावानुमितेरामादेतत्कृतेपत्त्वविनेनत्वमित्यर्थविषयविरहाव
च्छेदसंस्कारभावस्यपक्षतायामपि संदेहस्य पक्षतामपेक्षाद्वर्मित्यादिग्रन्थेनापेक्षापत्ततायववेनास्य व्यभिचारस्य संदि
कालीनानुमितिस्थले तावच्छेदकविशेषणानां विशिष्टप्रतिबन्धकस्यानुमितित्वव्यवहितप्राक्क्षण ॥ तत्तत्वाविनत्वादे
रेवसत्पाक्षेसमाधानमाह: अत्रैवातिव्याप्तिस्मरणादीत्यादिना ॥ अनुमितावाहितावेत्तपक्षयवत्त्वधर्मिताज्ञानेनतत्स्थली
यताद्यद्ग्रहानपरिग्रहः एवंतिव्याप्तिस्मरणादिरेककालीनत्वर्थः परामर्शादयावत्समसत्त्वादिरेको विशे
ष्याभावादेवाविशेषणाभावात् वीक्षणानुमित्यनुपपत्तिरतः परामर्शकालेवासाद्देसत्वइति अत्रानुमितेरतो

गदा.

नच सर्वोऽनुमितेर्नरसिंहोत्पत्तौ मानाभाव इत्यत आह तथैवेति अनुमित्सोत्तरोत्पत्त्यैवेत्यर्थः कारणीभूतस्येतितथा च
तादृशानुमित्साभावात्मककारणं विना तत्र यत्र सिषाधयिषास्थले यादौ विशिष्टाभाव निर्वाहकत्वमनुमित्सानन्तरोत्पत्तौ मात
सिद्धभावात् एतन्मतएवदीधितिकृतोक्तं अभिधेयं स्थिरेऽस्मिन्मतस्याग्रेऽवक्तव्यत्वादिति एवं तत्र मतमाह ग्रन्थेऽपि

२।

तिदिति द्विक्षणान्तरीतायामयोतिर्विलक्षणव्याहतायामतो लक्षणव्याहितायां चेत्यर्थः अनुमित्सायां अनुमित्स्योत्पत्तौ
तेनैकक्षणान्तरितायामपि अनुमित्सायां यत्रानुमितिस्तत्रापि उपपातिसत्त्वेन तत्रोत्पन्नाभवन्नपि तत्र एव प्रथमकल्पसिषा
धयिषोत्पत्तिक्षणमारभ्य क्षणावच्छेद्यात्मककालस्थैवाविवक्षितत्वात् ... क्षणान्तरिताऽनुमित्सस्थले अनुमित्स
निवेशे तृतीयक्षणे लयाल्पकाः पक्षे वा अनुमित्सा पतेः चेत्तदर्थे नोपचमक्षणे वा ऽ अनुमितेरिति ध्येयं वा व्यासि
षाधयिषायदे[illegible] वक्तव्या साच योग्यता च स्वोत्पत्त्यनन्तरमिति विप्रागभावो सत्वे ... स्वासमत्यातेरस्माहेति
व्यत्यत्याह्लो न्यतिपदस्य प्रागभाव परत्वात् अन्यथा सिषाधयिषोत्पत्तिकालिकानो योग्यतानुपपत्तेः तद्हि नोपक्षणे
अनुमितेरनुत्पत्तिसाहित्यसिद्धि प्रागभावः न च प्रतियोगित्वप्रागभावप्रतियोगित्वो विशेषसिद्धि प्रतियोगी स्वसमा
नाधिकरणप्रागभावसंबधेन प्रागभावध्वंसविशेषेरूपविषयासिद्धि प्रागभावमनुमित्सायोग्यतेति एव मितव्य
अनुमित्साः एवं तद्विषयोः स्वतस्मिन्ननन्तरं चारणायदलद्वयोपादानेन वानागतानां यावदनुमितौ नामवानुमित्साविष
यत्वसंभवात्त्वविषयोः तै कानुमिता अनुत्पन्नायामपि भाविव्यन्तरेण प्रागभावमादाय योग्यताप्रसंगद्गतिवाच्यं १
स्वविषयसि [illegible] समानकालीनत्वमेवप्रागभावविशेषणादेयम् अनुमितेर्यदा अनुमितिर्मास्तु इत्याद्यनन्तरे यदा
अनुमित्यादि रूपविषयसिद्धावपि यद्यनुमितु तत्रासंगोऽपि प्रसह्य न साध्यपक्षवैशिष्टस्यावगाहि ... अनुमि
तौ न रेदिव साविलंबेनाप्यनुमितिप्रसंगादित्यन्वयः एतत्त्वनुमित्सासिद्धिविषयसिद्ध्या व्यक्तिप्रागभावासत्त्वेन योग्यतान्

तेनोपपत्तिसंभवइत्यतोतथानुमित्यनुत्पादइतिद्वित्रिक्षणादिविलंबेनानुमितेरिष्टत्वात्तद्दिवसादिविलंबेनानिष्टत्वेनुमि
तेरिष्टत्वात् इंद्रियादिनानिर्णीतइतिलिंगेननिर्णीतेसाध्येऽनुमित्साविषयसिध्युत्पादएवेत्यतइंद्रियाहितेनेतिआदिनाग्रा
ह्यादिपरिग्रहः अनुमित्सेति अनुमित्साधिकरणक्षणाव्यवहितोत्तरक्षणमारभ्यक्रमेणपक्षविषयकलिंगज्ञानव्याप्तिस्मरणयो
रुत्पत्तौसत्यामुत्सर्गतोयावताकालेनपरामर्शोत्पत्तिः अनुमित्सोत्पत्तिक्षणमारभ्यतत्क्षणपर्यंतंयावंतःक्षणाः योवाताबदधि
कक्षणानवयीस्थूलकालःतत्समुदायएवेत्यर्थःएवंचक्षणचतुष्टयंतदधिककालावनवस्थापितस्थूलसमयास्त्वयोग्यते
तिपर्यवसितंतदनुगमसूत्रस्वप्रागभावानधिकरणत्वस्वनाशाधिकरणसमयध्वंसाधिकरणतेसमयध्वंसानधिकरणत्वोभयसंबंधेन
स्त्रिघाधयिघावत्कालत्वेननअननुगतेनतत्तत्कालत्वेनगौरवात्तत्तत्कालोत्पन्नजनकत्वापेक्षयाअनन्तनुमित्सादिभेदानामेवनिवेशनौ
चित्यायोग्यतायाउत्पन्नजनकत्वकल्पेयिवक्ष्यमाणायाःपूर्वानुमित्साबलादनुमित्सोत्तरानुमित्यापत्तेरसंगत्यापाताच्चतत्रानुमितित्व
ण्स्योत्पन्नजनकत्वाकल्पकाभावादितिध्येयंअनुमित्सोत्तरंयत्रविलंबेनलिंगदर्शनादिकंतत्रस्वपरामर्शेनत्रानुमित्सासत्त्वक्षणमाध्य
परामर्शोत्पत्तिक्षणपर्यंतस्यायोदंडादिरपीतितद्वारणायलिंगदर्शनादेरनुमित्साक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वमनुसंधेय
त्रानुमित्सोत्पत्तिद्वितीयक्षणएवलिंगव्याप्तिविषयकमेकंस्मरणंतस्यक्षणएवपरामर्शोत्पत्तिस्तत्रलक्षणत्रयमध्यएवपरामर्शोत्पद
नेतरतदनतिरिक्तकालमात्रस्यतथात्वभ्रमवारणायक्रमेणेति अनुमित्सोत्पत्तिद्वितीयतृतीयक्षणयोर्लिंगदर्शनव्याप्तिस्मरण
योःक्रमेणोत्पत्तावपिअनस्विन्अनिर्वंधेकान्तयत्रविलंबेनयथामर्शोत्पत्तिस्तत्राधिकाधिकक्षणानामपितथाविधतयातद्वारणाया
त्पर्यंतइतितादृशव्याप्तिस्मरणानन्तरक्षणेपरामर्शोत्पत्तावसतिविरोधिनीत्यर्थः अनुमित्यनन्तरक्षणक्षणाव्यवधानविरहेएवमत्र
णेऽनुमितिकृत्यनयनेनतद्दर्शयतितथाविधक्षणाव्यवधानात् इत्येतत्सूचनायभंग्यातादृशकालविशेषोपादानेइत्यवधेय नन्वन
थाविधकालस्योत्पन्नजनकत्वेगौरवमित्यतआह फलबलेनेति अनुमित्यानाशोऽनुमित्यात्मककार्योत्पत्त्यनुरोधेनेत्यर्थः तथाकल्पना

ग॰
टी॰

त् तादृशकालस्य उत्तेजकत्वकल्पनात् यत्र न तथाविधपरामर्शोऽपि तत्क्षणे अनुमितिप्रतिबंधकबाधनिश्चयसमवधानमासीत् तद्युगमसत्त्वेन
द्वितीयक्षणे न असिद्धौ सत्यां तदनंतरं चेदमनुमितिः प्रामाणिकोप्येवं यत्रानुमित्याद्वितीयक्षणे लिंगदर्शनसामग्रीसमवधानं तदनंतरं लिंग
दर्शनादिक्रमेण परामर्शोत्पत्तिस्तत्रासिद्धौ सत्यामनंतरक्षणेऽनुमितिर्वा न तथा न दोक्तापेक्षयाधिकस्य कालस्योत्तेजकत्वमावश्यकमि
त्याशयेनाह अनुमित्योत्पत्त्यनंतरमिति अनुमित्युत्पत्तिक्षणमारभ्य तदुत्तरमित्यर्थः यावत्कालमध्ये अनुमितिर्जायत इत्यग्रेतनेना
न्वयः अनुमित्योत्तरमनुमित्यानतरोत्पत्त्यादिवसादिविलंबेनापि सिद्ध्यनंतरमनुमित्युत्पत्त्या तावत्कालस्यानुत्तेजकत्वात् अनुमि
त्यानाशेपीति प्रागनुमित्यायामसत्यामपीत्यर्थः असत्यां सिद्धौ अनुमित्योत्तरं दिवसादिविलंबेनाप्यनुमित्युदयात् सिद्धौ सत्यामि
ति प्रागित्यादिः यावत्कालमध्ये यावत्क्षणानंतरक्षणे तावानेव कालः तावत्क्षणाधिकक्षणानवस्थायी अनुमित्याया अनुमित्यर्थक
सिषाधयिषापदेनोपलक्षितो विवक्षितः अनुमित्यायोगिनाया उत्तेजकत्ववान्सिद्धियोग्यताया अपि तल्लयकत्वयाप्रतिबंधकत्वशुचि
तमित्याशयेनाह यदि चेति सिध्यनंतरमिवेति शेषः तेन नाव्यवैयर्थ्यं द्वित्रिक्षणमध्ये इति द्वित्रक्षणमध्ये त्रिक्षणमध्ये चेत्यर्थः सिद्धि
स्वतन्त्रर्थक्षणे चेति फलितं सिद्ध्यासिद्धर्थकपदेन तावानेव तन्मात्रानंतरमापि द्वित्रिक्षणस्थायी त्रिक्षणस्थायी वा उपलक्षणीयो विवक्षणी
यः न तु सिद्ध्युत्तरं किंयत्क्षणमध्ये अनुमितिर्न जायते कियत्क्षणानंतरं वा मा भवत्विति अस्याविशिष्यनिर्णेतुमशक्यत्वात् कालस्य प्रतिबंधक
त्वकल्पनमसंभवि एवमुत्तेजककालस्यापि विशिष्यनिर्णेतुमशक्यतया तादृशोत्तेजकत्वमपि तथेत्यत आह विशिष्येति अव्यवहितैः सा
वधानैः नियमः निर्णयः तथा च येषां विशिष्य तावत्कालानिमसमीभवति तेषामेव तत्र विशिष्य प्रतिबंधकत्वावगमो भविष्यति अन्ये
षां तु सामान्यत एवेति भावः केचित्तु नानुवेलाविशेषाणां सिद्धिसिषाधयिषाधिकरणकालत्वेन चेत् प्रतिबंधकोत्तेजकभावः तदा
धिकाधिककालस्यापि तथात्वप्रसंगः अनंतप्रसक्तानुगतधर्मांतरं च दुर्वचमेवेत्यत आह विशिष्येति अनंतप्रसक्तानुगतविशेषण
विशेषं निवेश्येत्यर्थः क्षणानियमः कतिपयक्षणानामेव तथात्वेन व्याधिकाधिकक्षणानामिति नियमनि[illegible] अव्यवहितैः [illegible]

22

घटैः सिषाधयिषोत्पत्तिलक्षणमारभ्य लक्षणचतुष्टयादेः स्वप्रागभावानधिकरणत्व स्वनाशाधिकरणसमयनाशाधिकरणत्वोभय
संबंधेन सिद्ध्यादिमत्त्वमेवानुगमकमतो नातिप्रसङ्गश्चेति भावः इत्यपि व्याचक्षते नवीनास्तत्र स्वरससूचनाय सिधोक्तमवच्छेदात् संबंधत्वे
मानाभावात् तत्तद्व्यक्तित्वेनोत्तेजकत्वाभ्युपगमे उक्तदोषापातादिति इच्छायाविषयसिद्धौ सत्यां चरितार्थतया नोत्तरका
लमनुमितिर्जन्यत इति तद्वारणाय स्वविषयसिद्ध्यनुपहितत्वेनेच्छाविशेषणीया तत्र तद्विषयसिद्धिदशायां परामर्शानुमि
त्सासमवधानसंभवएव तद्विशेषणमर्थवद्भवति तच्च न घटते इच्छापरामर्शयोर्युगपदुत्पादासंभवेनानुमितिकाले एकतरवि
नाशावश्यकत्वादित्यत आह दृष्टान्ति अत्रैवेति सिद्धिप्रतिबंधकतावच्छेदककोटौ तदिच्छाविषयसिद्ध्यनुपहितत्वेन तद्विशेषणमित्य
निमेणान्वयः निर्णयेच्छानिर्णीयत्वप्रकारकेच्छा अनुमितित्वप्रकारकेच्छायाः प्रत्यक्षात्मकसिद्धौ चरितार्थतया तद्दशाताद्दश
सिध्यनंतरमप्यनुमितिरुत्पत्तेः श्रानुमित्योत्पत्तिकाले विशेषणाज्ञानेनोत्पत्त्यसंभवेन तत्स्वर्वमेवद्वृत्तिविशिष्टप्रत्यक्षसामग्रीसमव
धानस्यावश्यकतया प्रत्यक्षसामग्र्या बलवत्त्वेन दृष्टोत्पत्तिरेव न संभवतीत्यतः पूर्वोक्तन्यायेनेति अनुमित्याः पूर्वकालोत्पत्त्यादिप्रकारेणेत्य
र्थः स्मरणे विशेषणज्ञानापेक्षाविरहात् उक्तप्रयासं विनैवेच्छा द्वितीयक्षणे विशिष्टपक्षस्मरणे निर्वहतीत्यभिसंधायाह स्मरणे
वेति अनुमितित्वप्रकारकेच्छायामपि तद्विशेषणदानस्य प्रयोजनमाह यत्रैवेति साध्यव्याप्यविशिष्टपक्षस्मरणस्य साध्यविशि
ष्टपक्षविषयकत्वानुसारणे तृतीयक्षणे साध्यस्य तद्व्याप्यस्य चानुमितेर्द्वितीयक्षणे साध्यतद्व्याप्ययोरनुमित्योश्च निर्वाहाय सा
ध्यव्याप्यतद्व्याप्यतदुभयानुमितिनिष्ठसाधनताविषयकत्वानुधावनं साध्यानुमिते स्वादनंतरं चन तत् तदनुमित्यापत्तेश्च संपा
दनाय साध्यानुमितायाः साध्यव्याप्यस्यापि निश्चिततया न तदनुमितेः संपादनाय च साध्यव्याप्यानुमित्या यास्तत्र तत्त्वयोरित्या
दिना अनुसरणे अनुमित्या द्वितीयक्षणे साध्यस्यानुमितौ तदनंतरं तदनुमितिरिति वैशिष्ट्येवेति साध्यव्याप्यस्यानुमितौ च परामर्शस्या
भावान्नापत्तिसंभव इत्यत स्तदनंतरमुभयानुमित्यनुसरणे अनुमित्यासत्तिलक्षणावधिकलक्षणचतुष्टपदिद्वयप्रयोजकतायामुत्तेजक

ग॰ टी॰ त्वमनेनयत्रपर्वतेवह्निमदनुमितिर्जायतामितीच्छानन्तरोवह्निव्याप्यवान्पर्वतइतिपरामर्शस्तदनंतरंचपर्वतोवह्निमानित्यनुमिति तत्रा
पिताहशानुमित्यापत्तिर्लभवतीत्याह योगिनेति तदिच्छाविषयसिध्यनुपहितत्वंतदिच्छायाविशेषणं देयमितिशेषः प्रत्यक्षात्म
कासिद्धिसमवहितानुमितित्वप्रत्यक्षात्मज्ञानत्वादिप्रकारकेच्छावलादेवानुमित्यनुत्पत्त्यात्तदिच्छाविषयेतिविशेषणंतथानद्विष
23 येत्यर्थः अथप्रत्यक्षात्मकासिद्धेरपिनिर्णीयत्वादिप्रकारकानुमित्याविषयतयाविषयान्तरस्याव्यावर्तकताप्रसंगः नन्वच्छिक्ति
त्वेनतिवेशोऽत्रेजकीभूतेच्छाव्यक्तिसमसंख्याभावानांसिद्धौविशेषणतयागौरवं नंतत्तदिच्छाविषयसिध्यनुपहितत्वतत्तदिच्छात्वे
नउत्तेजकतामपेक्ष्यताघवान्नतत्तिणावच्छिन्नेच्छात्वेनतथात्वकल्पनाप्रसंगश्चेतिचेन्न प्रागुक्तयानयाइच्छाविषयत्वावच्छेदक
ताया अप्रकृतसाध्यविशिष्टप्रकृतपक्षविषयकानुमितित्वादिपर्याप्तिनिवेशस्यावशकतयाइच्छाविषयतावच्छेदकतापर्याप
प्त्यधिकरणरूपभेदेनेच्छायाः पृथगुत्तेजकतायाआवश्यकत्वात्तत्तद्धर्मप्रकारकेच्छायांतत्तद्धर्मावच्छिन्नानुपहितत्वंनिवेशनी
यमित्यत्रैवतात्पर्यात् अतएवचानुमितिद्वयेजायतामित्येताहशेच्छावलाद्भिन्नानुमितिद्वयमप्युपपद्यतेएकानुमित्युपधान
दशायामपिद्वित्वावच्छिन्नानुपहितत्वस्याक्षतत्वात् अथवास्वविषयकत्वस्वसामानाधिकरण्योभयसंबंधेनप्रकृतपक्षधर्मिक
प्रकृतसाध्यनिष्ठयद्विशिष्टान्यत्वमेवानुपहितत्वंतात्पर्यः भेदस्याव्याप्यवृत्तितयाऽनुमितिदशायामिच्छायासिद्धिविशिष्टत्वेपि
तत्सर्वेविशिष्टान्यत्वमव्याहतंप्रकृतपक्षकप्रकृतसाध्यकानुमितिविषयकसमूहालंबनेच्छायांपक्षान्यपक्षकानुमितेरन्यसा
ध्यकानुमितेर्वाविषयतातत्रतद्वलादन्यानुमित्यनंतरंप्रकृतानुमितिनिर्वाहायप्रकृतपक्षेप्रकृतसाध्यावगाहित्वंनिष्ठत्वविशेष
णंपतद्विशेषणमनेनभावव्यादित्वादिप्रकारकेच्छायाः पृथगुत्तेजकत्वंगीकारात्तत्ताहशेच्छावलादनुमित्यनंतरमनुमित्युप
पत्तिः द्वित्वप्रकारकेच्छावलाद्धुतानुमितिद्वयानंतरंअनुमित्यनुत्पत्तयेमवश्यथनमनुमित्साघापवानवस्थानात्योग्यतायाउत्तेजक
तामनेनचद्वित्वादिप्रकारकेच्छायोग्यताद्वित्वाद्यवच्छिन्नानुपहितत्वेनैवपृथक्पृथगुत्तेजकतावाच्येतिकृतमतिविस्तरेणेत्यलं

त्विच्छायाः इच्छाया इति निरुक्तयोः पक्षतायाः वाऽभावेन विशिष्टायाः सिद्धेरभावस्य पक्षतात्वे यत्र साध्यकपक्षकस्थले कदाचित्
प्रिकस्य चिदिच्छा न जाता तत्र पक्षत्वाप्रसिद्धिरित्याशंकायां विरुद्धविषयिणी भगवदिच्छा यादायकेषां चित्समाधानमात्रेतादृशा
स्थले इच्छाविरहविशिष्टसिद्ध्यभाव एव पक्षतेनेति समाधत्ते पक्षसाध्येति पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनेत्यर्थः प
क्षताभेदादित्यसिद्धिपदार्थस्य प्रकृतपक्षतावच्छेदकादिवदितत्वादिभेदेनेत्यर्थः तिभावः पक्षेति यादृशपक्षकयादृशसाध्यक
स्थले इत्यर्थः सिषाधयिषां विनैव पक्षसाध्यानुमितिर्न जायतेति सिद्धिकालेपरामर्शसत्वेऽनुमित्या यावदसमवधानादिति भावः सिषा
भावमात्रमिति इच्छाभावाविशेषितायाः एव सिद्धेरभाव इत्यर्थः सिद्धिकालीनानुमित्यनुरोधेनैव विशिष्टसिद्ध्यभावस्य पक्षता
त्वोपगमादिति भावः तेनेति यत्रानुमित्योत्पत्तिरप्रसिद्धाप्रसिद्धा वा पिनानुमितस्तत्पादे प्रयोगिनी न तु विशिष्टाभावस्य पक्षतात्व
स्वीकारे प्रयोजनविरहेणेत्यर्थः उक्तसाधारणेति सर्वत्रैव पक्षतायाः सिषाधयिषाविरहविशिष्टसिद्ध्यभावपदार्थत्वसंपाद
नायेत्यर्थः नोपादेय इति शाब्दे का स्यादनुपादेयत्वात्कारणतावच्छेदकगौरवसहिष्णुतायाः अन्यापित्वादिति भावः परामर्शसह
वैकालीनत्वलानुमित्यानाशोऽनुमित्यानन्तरमकल्पयित्वा योग्यतायास्त्वात्रजनकत्वमनाहत्यानुमितिमुपपादयतः सार्वभौमस्य मतमा
ह यत्त्विति सिषाधयिषानाशोत्तरयादृशसिध्यनन्तरमनुमितिस्तस्याः सिषाधयिषाविरहविशिष्टत्वलक्षणाव्यवहितोत्तरत्वेनो
त्पत्तिकानुमितिकतयाभिप्रेतनिवेशानवदमतिवेधकालोपपत्तिरितिसिषाधयिषाविरहविशिष्टत्वं च लक्षणस्यावाधिकरणाव
च्छेदेनवोध्यं तेन सिसाधयिषावत्त्रापि कालस्य सिसाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्टतया यत्राक्र
मेण सिसाधयिषासिद्धिपरामर्शानुमितयः तत्र सिसाधयिषाविरहविशिष्टत्वविशेषणेनोपपादयस्यानुमित्यस्य सिद्धलक्षणानिषा
व्यवधानस्यैवानुरूपतादवस्थ्यनिरक्तत्वपदेनापि भेदप्रतियोगिनीसिद्धिरेवोपादेनापि भेदप्रतियोगिनीसिद्धिरेवोपादेयाप्रति
योगिवैयर्थिकरण्यस्याभावविशेषणतामाहत्य सिसाधयिषाधिकरणात्तृणवारणेऽनरनुपादेयं प्रतियोगिपदेन सिसाधयिषा

ग॰
९॰

विरहप्रतियोगिन एव विशिष्य विवक्षणीयतया सिसाधयिषायाः सिसाधयिषात्वेन निवेशमुपेक्ष्य सिषाधयिषायाः विरहप्रतियो-
गित्वेन निवेशनस्याशेषावेष्टनेन नाशिकास्पर्शतुल्यत्वात् सिषाधयिषानधिकरणत्वनिवेशने च सिषाधयिषाविरहवैयर्थ्याद्वक्ष्यमा-
णत्वनिवेशनव्याहत्यसङ्गतेः सर्वेषामेव लक्षणानां सिषाधयिषाविरहविशिष्टपूर्ववर्तिक्षणध्वंसाधिकरणक्षणध्वंसाधिक[illegible]
तादृशध्वंसानधिकरणत्वरूपाव्यवहितोत्तरत्वाश्रयक्षणाप्रसिद्धिरेतः सिषाधयिषाविरहविशिष्टक्षणध्वंसाधिक[illegible]निवे[illegible]
पदं भेदप्रतियोगितनास्तिष्ठिव्यक्तिपरं सिद्धिसामान्यपरत्वे पूर्वपूर्वसिद्ध्यधिकरणकालध्वंसाधिकरणकालध्वंसाधि[illegible]तया
पूर्ववदप्रसिद्ध्यापत्तेः इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वनिवेशे यौगपद्यानभ्युपगमे यत्रानुमित्य[illegible]
त्मकपरामर्शस्तदनन्तरं घटेच्छा तच्च तादृशसिद्ध्यधिकरणस्यैकस्यापि क्षणस्य इच्छाविरहविशिष्टत्वा[illegible]
तमसम्भवात्त्वात् सिषाधयिषाविरहविशिष्टतदभावो नानुमित्यव्यवहितपूर्वक्षण इति तत्रानुमितिर्नि[illegible]
मितित्वनसाधीयः घटेच्छोत्पत्तिक्षणपूर्वमनुमितिसामग्रीसत्त्वेनानुमित्युत्पादबीजसद्भावेऽत्यात्[illegible]
बुद्ध्यात्मकबाधादिविषयानन्तरनीमत्यनुत्पादसम्भवः अपेक्षाबुद्ध्यनन्तरक्षणे विशेषगुणविशेषगुणानां[illegible]त्रयाव-
स्थावसम्भवात् यत्र यत्रानुमितिस्तानन्तरं घटेसाधनेनन्तं सिद्ध्यात्मकपरामर्शस्तदनन्तरं चानुमितिस्तत्रानुमित्युत्पादक्षणोत्पन्नेच्छाविरहवि-
शिष्टतत्सिद्ध्यधिकरणाव्यवहितोत्तर इति तादृशसिद्धेस्तदनुमित्यप्रतिबन्धकत्वात् सिषाधयिषापर्यन्तानुधावनमिति तदप्यसत्
इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वशरीरे व्यवस्वरनप्रतियोगिस्वक्षण एवेच्छाविरहविशिष्टत्वनिवेशस्य प्रयोजनवत्तया
तद्व्यवधारकत्वघटकस्वप्रतियोगिनि स्वक्षणे तद्विशिष्टत्वस्यानिवेशनीयतयोक्तानुमित्युत्पत्तिक्षणस्य सेच्छाविशिष्टत्वेन तत्सिद्ध्यधिकरणाव्य-
वहितत्तादृशसिद्धेरिच्छाविरहविशिष्टस्वलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकयाऽनुमित्यनिर्वाहविरहात् प्रथमविशि-
ष्टान्तव्याकृतिरयं सिषाधयिषापूर्वस्यापिनः कस्यापि स्थूलकालस्य परामर्शोत्पत्तिकाले विनाशे पूर्वकालावच्छेदेनासिषाधयिषा

विरहविशिष्टसिध्यधिककालपदमुपेक्ष्यलक्षणपदोपादानं अथसिषाधयिषाविशिष्टत्वनिरूपिताधिकरणत्वनिवेशेप्युक्तस्थू
लकालस्यविभिन्नलक्षणावच्छेदेनासिषाधयिषाविरहासिध्युभयाधिकरणत्वेपिसर्वेषेवविशेष्याभाववविशेषणाभावान्यतरप्र
सक्ताविशिष्टाभाववत्त्वयाविशिष्टाधिकरणत्वासंभवात् क्षणत्वनिवेशनमंतरेणैवव्याप्तिस्संभवति नचाशिषाधयिषा
पूर्वक्षणादेःसिद्धिक्षणादेश्चप्रत्येकंविशिष्टाभावावच्छेदकत्वेपितदुभयानुगमकान्यतरत्वाद्यवच्छिन्नस्यैकक्षणावच्छिन्न
त्वाविशेषणतासामानाधिकरण्यसंबंधेनासिषाधयिषाविरहविशिष्टायासिद्धेरधिकरणतावच्छेदकत्वेबाधकप्रकाभावात्
एकरूपावच्छिन्नस्यैवविरहद्वयावच्छेदकत्वविरोधादितिवाच्यं सिषाधयिषालक्षणस्यासिषाधयिषाविरहाधिकरणतयातत्
साधारणान्यतरत्वावच्छिन्नस्योभयाधिकरणत्वेपिविशेषवत्वानवच्छेदकतत्क्षणसाधारणरूपावच्छिन्नस्यविशिष्टाधिकरण
त्वासंभवात् नैवंएकक्षणाव.... विशेषितसामानाधिकरण्यसंबंधेनएकविशिष्टापराभावएवविशेषणशून्यविशेषाधिक
रणकालेविशेष्यशून्यविशेषणवतिचवर्तते अन्यथातत्कालेएकतराभावप्रसक्तस्यासिषाधयिषाविरहसिद्ध्युभयाभावस्यसर्व
क्षणावच्छेदेनैवसत्वविरोधेनतदुभयत्वावच्छिन्नाधिकरणतायाअनिर्वाहात् नचतदुभयपर्यवसाप्रतीतेरप्यनुपपत्तेः एवंचएक
क्षणावच्छिन्नसामान्याधिकरण्यसंबंधेनएकविशिष्टापराधिकरणत्वमेवप्रसक्तस्थूलकालेनसंभवतितस्यैकक्षणावच्छिन्नोभ
याधिकरणत्वनियतत्वात् क्षणत्वादिनतादृशसंबंधनिवेशापत्तयावत्साधिकरणक्षणत्वनिवेशएवोचितः वस्तुतस्तुकेवलसा
मानाधिकरण्यसंबंधेनएकविशिष्टापराभावश्चयदाकदाचित्तद्विशेषणवति यद्यपिसिषाधयिसिषादयिषाविरहवैशिष्ट्याव
च्छेदेनस्वाधिकरणत्वानिवेशेपितादृशकालेकालांतरेणासिषाधयिषाविरहवैशिष्ट्यस्यतन्निष्ठसिध्यधिकरणतानवच्छेदक
त्वात्तादृशकालमादायातिप्रसक्तदूषणस्यानवकाशात्तथापिसिषाधयिषाविरहवैशिष्ट्योपलक्षितसिध्यधिकरणत्वविवेशाभिप्राये
णक्षणत्वोपादानं यद्यपिक्रियादिरूपतादृशस्थूलकालस्याप्येकक्षणावच्छिन्नस्यक्षणतयाक्षणत्वविनिवेशनेपितद्दोषतादव

ग० टी०

२५

वस्थं न तथापि स्वहृत्रियावध्वंसविशिष्टत्वरूपलक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशमात्रदोषः सिषाधयिषाविरह
विशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्नेनादृशस्थूलकालेन स्वाधिकरणत्वस्य ननु तदवच्छिन्नत्वनि
यमइति सिषाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वलाभायैव लक्षणपदोपादानं न भक्षणत्वमपि निविष्टमिति तत्र त्र्यव
हितोत्तरक्षणोत्पत्तिः स्वाव्यधिकरणावच्छेदेन वाव्याप्त्यनुमितिपदं वा स्वसमानाधिकरणानुमितिपरं तेन महाप्रलयानभ्युपगमे सकल
सिद्धेनाम्नुत्तरमेवासंख्यानामात्मनां कस्मिंश्चिदप्यनुमितिस्तत्या सिसाधयिषाविरहविशिष्टतादृशस्वलक्षणानन्तरक्षणोत्पन्नानु
मितिकभिन्नासिद्धदसिद्धद्वयोत्पत्तिमध्यक्षणोत्पन्नेच्छीया च सिद्धेरेव सिषाधयिषाविरहविशिष्टतदधिकरणक्षणप्रसिध्यास्त्वये
देन तस्याप्रवेशोपादानमशक्यत्वात् तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावात् सिषाधयिषाविरहविशिष्टानिरूक्तसिद्धिभिन्नसि
धेरप्रसिद्धेर्महाप्रलयस्याप्रामाणिकत्वेपि यदुत्तरमनुमितिः क्वचिदापनोत्पन्नस्य तनादृशस्वोत्तरसिद्धेरेव प्रतिबंधकत्वं स्यात् नान्यस्या
इत्यनुपपत्तेर्नावकाशः अथ यथा नाशनिवेशात्प्रतिबंधकासिद्धिनाशानन्तरं तदधिकरणेऽनुमित्युत्पत्तावपि न तस्याप्रतिबंधकत्वादुप
पत्तिस्तथापूर्वसकलक्षणानामेकस्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणस्वरूपस्वलक्षणाव्यवहितत्वाक्रान्ततया अनादौ संसारे
सर्वासामेव सिद्धीनां पूर्वं कदाचित्स्वाधिकरणेऽनुमित्युत्पत्त्या सिषाधयिषायाश्रेनाऽस्यन्ना सिद्धिर्वा सिषाधयिषाविरहविशिष्टत्वाभा
वादप्रसिद्धिरतउत्तरवेति स्वाधिकरणक्षणध्वंसाधिकरणार्थकं सकलसिद्धीनामेव स्वलक्षणाव्यवहितोत्तरत्वाक्रान्तत्वात्तृतीयक्षणाविशि
ष्टानुमित्युत्पत्तिपर्यन्तं स्वपूर्वस्यापि स्थूलकालोत्पन्नानुमितिकतया सर्वेव दप्रसिद्धिरिति द्वितीयक्षणपदं च तु अभिप्रायात्मकसिद्धीनां
स्वाव्यवहितोत्तरक्षणवृत्तित्वात्मकानुमितिकत्वमाप्रतिबंधकत्वामनिरन्तरत्वनिवेशः यद्यपि स्वान्यत्वस्यानुमितिविशेषणत्वे
न दोषवारणसंभवस्तथापि स्वापेक्षादुर्ज्ञेयत्वाद्यावस्थायित्वस्य तदुत्तरसमानाधिकरणविशेषणोत्तरोत्पादस्यवोपगमे यत्रापे
क्षाबुद्ध्यात्मकानुमितिर्द्वितीयक्षणे नादृशाप्रत्यक्षाधिरूपासिद्धेस्तस्याश्चतुर्थक्षणेऽनुमित्युत्पादवारकतत्प्रतिबंधकत्वेनापयद्य

तदतिप्रसङ्गवारणायात्र प्रकृतत्वेन निवेशनं अयमनुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वं निरुक्तक्षणोत्पत्तिकानुमितिकासि
द्धिभिन्नत्वापेक्षया लघीयः कथमुपेक्षितमिति चेन्नयासति यत्र क्रमेण सिषाधयिषानुमितिस्तत्रेच्छाजनकसामग्र्या अनु
मितिप्रतिबन्धकत्वेनैवोत्तरानुमित्युत्पत्तिक्षणे अनुमितिवारणासंभवात् अव्यवहितपूर्वत्वघटकाघमित्यस्य यत्र तत्क्षणे तदव्यवहितप्रा
क्क्षणे वा सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन निवेशावश्यकत्वात् नाहं पक्षस्थलीयसिद्धेस्तृतीयक्षणे अनुमिति
त्यविरोधिता यः सिद्धौ सिषाधयिषाविरहवैशिष्ट्यस्य निवेशमन्तरेणैवोपपत्तेः मूलोपात्तसिद्धिविशेषणं सहकृतान्तं नि
ष्प्रयोजनकं स्यात् इति मूलविरोधः तत्रोत्तरेच्छाजनकसामग्र्याः अनुमितिप्रतिबन्धकत्वेपि मूलाविरोधोपपादनायोक्तयुक्ते
र्वैनैरादरः अत्र कल्पे वक्ष्यमाणानुपपत्तिं तृतीयक्षणसाधारणाव्यवहितोत्तरत्वानिवेशेऽभिकामत्वं अगत्या इच्छासाम
ग्र्या अनुमितिप्रतिबन्धकत्वमिति मतमाश्रित्य सूत्रोक्तं सहकृतान्तं सार्थकयितुमाह अथवेति अनुमितेरव्यवहितपूर्वस्या
पि नोत्पत्तिनाशे विरोधिनोपपन्नत्वे सिद्धिपदे अवगन्तव्यतीयसिषाधयिषाविरहविशेषणप्रयोजनं तत्र संप्रतिपत्तिं प्रदर्श
यन्नयमसिषाधयिषाविशेषणप्रयोजनं दर्शयति अथेति तृतीयक्षणे स्वाधिकरणकारणनाशसाधिकरणकालध्वंसाधिकर
णत्वसामान्याभावरूपावच्छेदकधानाभावस्फुटीकरणाय तृतीयक्षणावधायकान्ते तृतीयक्षणस्याभिहितं तृतीयक्षणव्यवधा
यकत्वं तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे सति स्वाधिकरणध्वंसाधिकरणत्वं सिद्धिनाशक्षणे सिषाधयिषासिषाधयिषोत्पत्तौ सिध्व
न्नत्वसिषाधयिषानाशक्षणे अनुमित्युत्पत्तौ वाविशेष्याभावादेवानुमितिः पूर्वं पदेनानिर्वाहति अतो ऽविरलेति पदेनासंपन्नवार
ति सिद्धौ सिषाधयिषाविरहस्य विशेषणत्वे उक्तस्थले सिद्धिद्वितीयक्षणे अनुमित्यनुत्पत्त्यापत्तेः स्वक्षणाव्यवहितोत्तरक्षणो-
त्पत्तिकानुमितिकभिन्नत्वेन सिषाधयिषोत्पत्तिक्षणेपि च तादृशसिद्धिसत्वेन तदभावरूपपक्षतायाः अनिर्वाहादिति भावः प्रार्थ
मिकाद्यवति सिषाधयिषाविरहस्य पक्षतापत्तेः स्वक्षणास्येति विशेषणमित्यनुपपद्यते उत्तरपतिः यत्रेति ज्ञानेच्छयोर्युगपदुत्पाद

ग॰ दे॰

26

यत्नेसिषाधयिषोत्पत्तिकालेसिद्ध्यभावेऽसिद्धेर्वा परामर्शोत्पत्तिकालेसिषाधयिषासत्वादेववैशिष्ट्याभावोऽनिर्वहतीतिक्रमेणेति
प्रविरलक्रमेणेत्यर्थः सिषाधयिषानिवृत्तेर्वनाद्यक्षणिकाविलंबेपि सिषाधयिषाविरहेणत्वेन विशेष्यापि पक्षतानिर्वाहस्य वर्तमाण
त्वात् सिद्धिपरामर्शयोः परामर्शानुमित्योर्वा कालत्वव्यवधानेनोत्पत्तौ विशेष्याभावादेववैशिष्ट्याभावसंपत्तेः सिषाधयिषा
नुमितित्वप्रकारिकानुमित्सा पक्षानुमितित्वप्रकारिकानुमित्सात्रानुमित्याकारिषाविच्छायाः स्वविषयसिध्युपहितत्वात् नड
नरमनुमित्युत्पत्तिरेव न संभवतीति प्राप्यद्वैकालिकसत्तात्पर्यमिति सिषाधयिषाविरहस्य लक्षणविशेषणस्योपादानेन तत
त्रानुमित्युत्पादकक्षणस्य सिद्धित्वेन ध्वंसाधिकरणपरामर्शोत्पत्तितत्पूर्वध्वंसाधिकरणत्वेन सिद्धित्वेन व्यवहितत्वविरहान्नातिदृष्टासिद्धेर्व
विपरीतबोधकत्वापत्त्यापत्तेरनुपपत्तिः तद्विशेषणस्योपादाने वा सिद्ध्युत्पत्तिक्षणस्य सिषाधयिषाविशिष्टतया सिषाधयिषाविरह
विशिष्टत्वलक्षणः परामर्शोत्पत्तिक्षण एव न ध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादकक्षणस्यासत्त्वमेवेति
पक्षतोपपत्तिरिति भावः एवमुभयविधस्य प्रामाण्यज्ञानाभावेऽपि निवेशनीयत्वेनाविरलक्रमेणाय यत्र सिद्धिनिष्ठधर्मिकाप्रामाण्यज्ञानानु
मित्यत्वस्य द्वितीयत्वेऽपि पक्षतासंपत्तये शेषघटितत्वान्निवेशः प्रथमद्वितीयतन्निवेशात्तु यत्र क्रमेणाभाविधर्मिकाप्रामाण्यज्ञानसिद्धि
परामर्शानुमित्यत्वस्य पक्षतासंपत्त्यर्थमिति एवं तृतीयत्वसाधारणव्यवहितेनोऽनुपत्वमते यत्र क्रमेणासिद्धितद्धर्मिकाप्रामाण्यज्ञा
नानुमित्यत्वस्य चरमक्षणेयत्नताधारणायोग्यत्वान्निवेशः सिद्धेस्तन्निवेशात्तु पक्षतासंपत्त्यर्थमिति बोध्यम् पक्षताविरहेति सि
द्ध्युत्पादकक्षणस्यापि सिषाधयिषाविरहविशिष्टतयाऽनुमित्युत्पादकक्षणस्य तादृशक्षणध्वंसाधिकरणध्वंसाधिकरणक्षणत्वान
न्याभावात्मकतादृशक्षणाव्यवधानविरहादिति भावः यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धि
नेच्छाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वमङ्गीकृत्य यत्राननुपपत्तिः शक्यते वारयितुं तथाप्यव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षता
पक्षस्यातिनत्वान्नैव दोषोऽव्यवहितद्वितीयक्षणसाधारणमव्यवधानं निवेशनीयं कृते प्रथ्ये निरुक्तीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति

लक्षणद्वयानुगमकस्वलक्षणत्वेन स्वलक्षणमनन्तर्भाव्य प्रातिस्विकरूपेण स्वलक्षणस्याव्यवधानशरीरे निवेशनीयत्वात् तृतीयलक्षणे च
सोऽप्यन्निलक्षणध्वंसाधिकरणद्वितीयलक्षणध्वंसाधिकरणत्वेऽपि स्वाधिकरणद्वितीयलक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन
स्वलक्षणाव्यवधानस्यादत्तत्वादिति भावः द्वितीयतृतीयलक्षणसाधारणो स्वलक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसा
नधिकरणत्वरूपानुगताव्यवधाननिवेशनेन संभवति अपेक्षाऽऽत्मकासिद्धिं चतुर्थसिषाधयिषाघटितलक्षणेऽत्यन्तानुमितौ य
भिचारतादवस्थ्यात् चतुर्थलक्षणसाधारणानुगताव्यवहितोत्तरत्वस्य कथंचिन्निवेशे च तुर्ये लक्षणेऽत्यन्तानुमितिकायेंऽनाहुः अ
नात्मकासिद्धेः प्रतिबन्धकताप्रत्ते रिति धेयं अपेक्षाबुद्धिः द्वितीयलक्षणघटकलक्षणत्रयनादितः बुद्धिः द्वितीयतृतीयलक्षणसाधा
रणमनुगताव्यवहितोत्तरत्वं प्रकारान्तरेण निर्वक्ति स्वध्वंसेति उभयत्र कालपदं कालिकसंबंधेन स्वध्वंसवत्त्वलाभाय तेन न सर्व
स्यैव लक्षणस्य स्वनाशविषयकपूर्वपूर्वज्ञाननाशवत्त्वेऽपि न सत्वेनाप्रसिद्धिः न वा स्वपूर्वकालस्यापि तत्पूर्वकालीनस्वविषयक
ज्ञाननाशवत्त्वेन तदुत्तरत्वस्य न साधारण्यप्रसंगः एवं न नियतानुमितिषाधयिषासिद्धिपरामर्शोऽनुमितीनां क्रमेणोत्पादे तत्र सिद्धेः त
णे सिषाधयिषाविरहविशेषणमन्तरेणापि अव्यवहितोत्तरलक्षणेऽत्यन्तानुमितिकानिर्वाहाद्द्वन्द्वप्रथमविशिष्टानन्वयाद्व्यासंग
तेः स्थलान्तरेतद्व्याप्तिमाह तथा चेति प्रथमलक्षणे प्रत्यनावारणायेति तादृशासिद्धेस्तृतीयलक्षणेऽत्यन्तानुमितिकत्वानितरा
सिद्धिभिन्नत्वविरहेण प्रत्यनाप्रसक्तेरिति भावः प्रथमलक्षणे पूर्ववत्सिषाधयिषाविरहविशेषणसत्त्वेऽपि स्वभाषाधिकरणका
लध्वंसानाधिकरणत्वघटितान्यव्यवहितोत्तरत्वनिवेशकल्पेनोक्तातिप्रसंगवारणसंभवः अनुमितिस्त्वपि लक्षणेनाऽसिद्धिनाशा
धिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टनाशाधिकरणप्रथमलक्षणध्वंसाधिकरणत्वस्य च सत्त्वात्
नोऽव्यवहितोत्तरलक्षणे नस्या विशेषणतामाह उक्तेति तथा चोक्तस्थले सिध्यव्यवहितोत्तरत्वे तृतीयलक्षणेऽपि सिषाधयिषासत्त्वात्तः
सिषाधयिषाविरहविशिष्टतादृशालक्षणोत्पन्निकत्वेनाऽनुमितेरिति तादृशासिद्धेरनुमितिप्रतिबन्धकतानिर्वाहद्वितीयविशिष्टतम

ग॰
टू॰

यद्विशेषणत्वंयस्ययत्प्रयोजनकत्वंवाप्रागभिहितंइदानीमपितस्यतद्विशेषणत्वंतत्प्रयोजनकत्वंनतुप्रथमविशिष्टान्तवदन्यादृश
मितिप्रदर्शयितुंपूर्वोक्तमप्युच्चरतिद्वितीयांत्विति सिद्धेर्विशेषणमित्यनुषज्यते तत्रैवेति यत्रक्रमेणसिद्धिसिषाधयिषानुमितयस्त
त्रैवेत्यर्थः द्वितीयदलइति तृतीयदलेऽनुमितिनिर्वाहार्थमित्यादिः पक्षतासंपत्तयेइतिविशेषणाभावेनविशिष्टाभावरूपपक्षता
निर्वाहायेत्यर्थः अन्यथाउक्तक्रमेणानाहार्यसिद्धेर्निरुक्तसिद्धिभिन्नतयाविशेष्यसत्वेनपक्षताउपपत्तेरितिभावः ननुदर्शितस्थलेप्र
थमदलेपक्षतासत्वेपिनपक्ष सिषाधयिषाकालेनुमित्युत्पादकेच्छासामग्र्याः प्रतिबंधेनापिअसंभवात्दलद्वयंचनिष्प्रयोजनकम्
याप्रथमविशिष्टान्तोपादानेद्वितीयमपिनिष्प्रयोजनंनाहार्यसिद्धेः स्वाव्यवहितोत्तरतृतीयदलोत्पन्नानुमितिकर्तृत्वेनवाप्रतिबंधक
त्वेनतृतीयदलोत्पन्नानुमितिनिर्वाहादित्याशयेनइच्छासामग्र्याअनुमितिप्रतिबंधकतामतेतदुभयंपरित्यजतियदिचेतिइच्छासाम
ग्र्यपेक्षयानुमितिसामग्र्याहीनबलत्वेपिअनुमित्याविशिष्टाया अनुमितिसामान्याइच्छाप्रतिबंधकताकल्पनस्यावश्यकतयातस्ये
बलवत्वकल्पनमुचितं अन्यथाइच्छासामग्र्यपेक्षयावाधादिरूपानेकप्रतिबंधकाभावघटिततयागुरुशरीराया अनुमितिसामग्र्याः
प्रतिबंधकतायामिच्छांतिवेशेनगौरवात्इतियुक्त्याज्ञानेच्छयोर्यौगपद्यस्वीकारसंभवेनचेच्छासामग्र्याअनुमितिविरोधिताव्यवस्था
पनेनसंभवतीत्याशयेन यदिवेत्युक्तंसिसाधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वेऽनुमित्यव्यवहितपूर्ववर्तित्वंपरित्यज्याव्यव
हितोत्तरदलोत्पत्तिकानुमितिकत्वरूपपक्षरूपविशेषणोपादानमनुचितमित्याशयेनाह अनुमित्यव्यवहितेति अनुमितिपदंस्वसमा
नाधिकरणानुमितिपरंअतोव्याधिकरणानुमित्यव्यवहितपूर्ववर्तिसिद्धेः स्वाश्रयेनुमित्यनुमित्युत्पादोपपादकतानिर्वाहः यत्राशा
नेनरयअनुमितिकृत्यघनेनाहार्यसिद्धेरप्रतिबंधकत्वावारणायाव्यवहितत्वोपादानेनतज्ज्ञानुव्यक्तिपूर्वकालीनध्वंसाप्रतियोगित्वरूपंपूर्व
दलेसिद्धावेववाविशेषणंपूर्वकालीनत्वंचकालिकसंबंधेनतत्प्रागभाववत्वमेवध्वंसस्यकालोपाधितयातदुपपत्तिः सर्वासामेवसि
द्धीनांपूर्वजाततयाकिंचिदनुमितिनिरूपितनिरुक्ताव्यवधानवत्त्वयाअनुमितिनिर्वाहतासिद्धिभिन्नप्रसिद्ध्यप्रसिद्धिरतः पूर्वदलमात्रेत्ये

२७

विशेषणं पूर्वत्वं प्रागभाववत्त्वं अग्रिमित्यादिपर्यन्तस्यापि स्थूलकालमहाकालसाधारणमिति न दोषस्तावदवस्थं अतः क्षण
पर्यन्तनिवेशनं प्रागभावावच्छिन्नत्वहृत्तित्वनिवेशने च सिद्धेस्तादृशध्वंसाप्रतियोगित्वात् तस्याः सिद्धिविशेषणत्वेव क्षणत्वमनुपादे
यमेव जन्यमात्रस्य कालोपाधित्वेन कालिकसंबंधेन प्रागभाववत्त्वं सिद्धेरेव विशेषणं देयं प्रागभावानभ्युपगमे वक्ष्यमाण
तज्जन्यत्वलक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमव्यवहितपूर्वत्वमेव क्षणविशेषणं न तु घटकदलानां व्यावृत्तिरेव व्यक्तीभविष्यति
अग्रिमाव्यवहितपूर्ववर्तिन आत्ममनोयोगादेस्तादृशसिद्धिभिन्नतया प्रसक्तप्रतिबन्धकतावारकद्वितीयसिद्धिपदसार्थ
क्याय प्रथमसिद्धिपदं न च प्रक्षालननाशेति न्यायेनोभयपरित्यागपर्वोचितः इति वाच्यं तथा सति वाधबुद्ध्यादेरपि निरुक्तरूपेण
प्रतिबन्धकतया तत्र तत्र प्रतिबन्धकताव्याघातात् न च व्याहन्यतां तत्प्रतिबन्धकत्वं तेन न हि न क्षतिमावहतीति किं न लाघवं तावता ला
घवमेवेति वैयर्थ्यदोषोऽस्त्विति एवं निवाच्यं पूर्वदोषस्यैव वैयर्थ्याद्यसिद्धेरित्यनेन स्वयं दर्शनीयत्वात् यद्यप्येवं प्रथमसिद्ध्यन्तपाद
नेऽपि वाधादेः स्वतंत्रप्रतिबन्धकताविरहप्रभीक्षणाद् द्वितीयसिद्धिपदोपादानेन विरुध्यते अखण्डाभावसंपादकत्वेन लक्षणदोषासंस
र्गादिति प्रथमतत्सिद्ध्युपादानमनुचितं तथाप्यग्रिमत्वव्यवहितत्वपूर्ववर्तित्वं स्वत्वघटितत्वेन निरुक्तरूपेणानुगमासम्भवेन तत्तद्व्यक्ति
त्वेन तेषां भेदकूटस्यैव निवेशनीयतया सिद्धौ सिध्यतिरिक्ततादृशपदार्थभेदानामव्यावर्तकानां निवेशे गौरवात् सिद्धिव्यक्तीना
भेदानिवेशनीयाः इत्येतत्सूचनाय प्रथमसिद्धिपदोपादानेऽत्र तत्पदार्थे च तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे भेदानां विशेष्य
विशेषणभावे विनिगमनाविरहेण महागौरवात् फलानुपादानेऽयं तत्सिद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतापत्त्या एवं साधीया
न् सिषाधयिषाविरहविशेषणपरित्यागस्यानुचितः सिषाधयिषाकालीनसिद्धिव्यक्तीनामनन्तानां तत्तद्व्यक्तित्वावच्छिन्नभेदकू
टनिवेशनेऽपेक्षया तादृशविशेषणदानस्यैव युक्तत्वादिति कथंचिदनुगमप्रकारः परिचिन्तनीय इति सिद्धेर्वैयर्थ्यमित्याशयेनैव वैयर्थ्याद्य
सिद्धेरिति वक्ष्यति तादृशसिद्धीनां भिन्नानां न परिचेय सिद्धिव्यक्तीनां निरुक्तद्वयेन निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेन तदर्थः अग

ग॰
द॰

स्यात्कार्यकारणभावभंगस्यमहादोषापत्तेरित्यत आह ताहृशेतिततद्व्यक्तित्वेनकस्समानप्रतिबंधकताकेत्यर्थः याहृशसिद्ध्युत्तरं सिषाधयि
षोत्पत्त्यावनुमिति सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणाय कल्पनीयप्रतिबंधकत्वाद्दृशव्यक्तौ सिषाधयिषाविरहवैशिष्ट्यनिवे
शनस्यावश्यकतयासकलेतितद्व्यक्तावपिसिषाधयिषाविरहविशेषणस्यावश्यकतयातदभिप्रायेणैवमूलोक्तंतदुपादानसंगतिर
तोदूषणांतरमाह तत्तत्समयेति तत्तदात्मनिष्ठाः सिध्यभावातिरिक्तसकलकारणसमवधानाधिकरणीभूतक्षणसंबंधव्यक्तयः
स्तासांविनिगमनाविरहेणानामिकासिद्धिसिषाधयिषानुमित्युत्पत्तिस्थलेसिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणायसिद्धेसिषाध
यिषाविरहविशिष्टतत्तद्व्यक्तित्वेनप्रतिबंधकत्वापेक्षयालाघवेनचप्रतिबंधकतापन्नेरित्यर्थः तथाचमूलोक्तस्यसिषाधयिषावि
रहविशेषणसिध्यभावस्यपक्षतात्वव्याघातइतिभावः ननुतत्तत्समयेः सर्वतत्तदात्मनांसंबंधाः स्वरूपानतिरिक्ताः तथाचतत्तदात्म
स्वरूपस्यतत्तत्समयस्वरूपस्यचासंबंधस्यप्रतिबंधत्वेतत्तदात्मन्यदातत्तत्समयेचान्यत्रात्मन्यनुमित्युत्पत्तिरतोऽनन्यस्यप्रतिबंधक
तांसंजयतितत्तत्समयेतिसिद्धमनंतरंसिषाधयिषादितीयक्षणेसत्त्वानुमितिस्थलेइत्यादिः सिध्यभावेतरसकलकारणाधिकर
णानन्तरक्षणावच्छिन्नानांतत्तदात्मनिष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः सामानाधिकरण्यसंबंधेनसिषाधयिषाविरहावच्छिन्ना
यास्तत्त्वसिद्धेः प्रतिबंधकत्वापेक्षयालाघवादितिभावः नियामकाभावात् नियामकाभावप्रसंगात् सिषाधयिषाविरहविशिष्ट
सिद्धिसत्त्वेद्वितीयक्षणेऽनुमित्युत्पत्तिनिर्वाहायानिरुक्तसिद्धिभिप्रसिद्धभावस्यपक्षतायाश्चनुमित्युत्पादनिर्वाहेनतदभावस्य
चान्योन्याश्रयभियाश्चनुमित्युत्पादानुत्पादप्रयोजकत्वासंभवादितिभावः नाहृशस्यान्योन्याश्रयस्यादोषत्वादिदंप्रतिबंधानिरस्य
ति नवेत्यादिनाप्यवकारार्थवाकारः अत्यन्तेः कारणतावच्छेदकावधिनसमाजाधीनत्वकथनेनतस्योऽकारणतावच्छेदकजातिनि
वेशाऽन्योन्याश्रयः सूचितः तथासतिप्रायशः कारणतावच्छेदकावच्छिन्नसमवधानस्यापिसत्येतनकार्योत्पत्तिप्रयोज्यत्वापातात्
निविशितेनिवेशनदूषणावहं अथवोक्तपक्षतायाः कार्योत्पत्तिनियामकत्वमेवानिवेत्यादिनानिराकृतंकारणतावच्छेदककोटावि

28

त्पादेः कार्योत्पत्तिनियामकतावच्छेदकतादृक्त्वं इत्यर्थः अनुमित्योत्पत्त्याश्रयदेशीयत्वं प्रतिबंधकत्वाकारयति तथासतीति तत्पदध्वंसाव्याप्येयं
यद्यपि स्वलक्षणाव्यवहितोत्तरलक्षणोत्पत्तिकत्वस्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रांतमिति भेदप्रतियोगितावच्छेदकगर्भे तन्निवेशानर्थ-
क्यात् तत्परिचयमात्रोपतां तत्तद्व्यक्तित्वेनैव भेदाः सिद्धो निवेशनीयाः तथा च कारणतावच्छेदकस्यानोत्पत्तिघटितत्वं तथापि भेद-
कूटनिवेशे विशेषणविशेष्यभावे विनिगमनाविरहेण कारणत्वानंत्यं दुष्परिहरमेवेति भावः कार्योत्पादादिकमित्यादिपदेन तादृ-
शगौरवप्रयोजककूटस्यापि परिग्रहः तस्य कारणतावच्छेदकत्वे एवं तृतीयप्रतिबंदे संगतेः अनुमित्यव्यवहितपूर्वो यत्र परामर्शादि-
तोऽनुमित्युत्तरमनुमितिविरहेणायोत्पत्तिकालावच्छिन्नत्वविशेषितेनेति स्वाधिकरणसमयध्वंसवदन्यकालसंबंधविशेषितेनेत्यर्थः
तादृशध्वंसवत्त्वं कालिकसंबंधेन तेनोत्पत्तिलक्षणस्यापि प्रतियोगित्वादिसंबंधेन स्वाधिकरणसमयध्वंसावच्छिन्नत्वेऽपि न क्षतिः एवं च
कालिकसंबंधेन तादृशध्वंसवदन्यात्मसंबंधविशिष्टस्य ज्ञानादेर्द्वितीयक्षणे सत्त्वाऽज्ञानिप्रसंगतादवस्थ्यमतः कालपदं तादृशकालसंबं-
धस्योपलक्षणविधया अवच्छेदकत्वे एवं दोषो नो विशेषणविधयानत्यात्वज्ञाभायोन्तरत्रानुषंगायचावच्छिचा तस्य कर्मधारयमध्यप्र-
द्वेपमुपेत्यावच्छिन्नत्वविशेषितेनेत्युक्तौ विशेषणत्वे चास्य समानाधिकरण्यसंबंधेन वोध्यधर्मिणो विशेष्यत्वात् कालांतराणानुमि-
तिसमानाधिकरणचद्ज्ञानादितोऽनुमित्याः प्रतिवारणाय स्वलक्षणाव्यवहितोत्तरलक्षणोत्पत्तिकत्वमनुमितिविशेषणं तदर्थश्च स्वाधि-
करणकालाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणयत्स्वाधिकरणं तत्सत्त्वोऽस्य पे-
क्षितं तत्तृतीयादिलक्षणस्यज्ञानाद्यनधिकरणत्वेऽपि संस्काराद्यधिकरणत्वात्तेन तादृशापेक्षाबुद्धिद्वितीयक्षणे अनुमितिवारणानुरोध-
स्तेन तदुपेक्षा वीजं तदानीं समानाधिकरणविशेषगुणोत्पादोपगमेऽप्यपेक्षाबुद्धेस्तृतीयक्षणावस्थायिनाया एवानुपपत्तेः वस्तुतो पे-
क्षानंतेपेद्विलक्षणावस्थायितामतपवैतत्स्थानिवीदप्रदर्शनं अन्यथासिद्ध्यादिद्वितीयक्षणे सत्त्वापेक्षाबुद्ध्यात्मकपरामर्शे तृतीयक्षणे-
ऽनुमित्यनुपपत्तेस्तस्य तृतीयक्षणपर्यंतावस्थानमते तद्द्वितीयक्षणे विशेषगुणानुत्पत्त्यानतदानीमनुत्पत्तिकालावच्छिन्नसविषयक-

ग० टू०

29

सतस्यइदं घटत्वादित्यवधेयं प्रत्ननुमितेः स्वसमानाधिकरणानुमितित्वव्रत्योत्पन्नज्ञानानतरानुमितित्वप्रसंगवावारणायाधिकरणांतं लक्षण
विशेषणं स्वपूर्वकालाधात्यत्रानुमितेरपिस्वाव्यवहितोत्तरत्वाक्रांतत्वद्वितीयलक्षण पर्यंत स्थायिस्थूलकालोपस्थत्रतयातवीषतादव
स्थामितिलक्षणत्वनिवेशः प्रत्ननुमितेः स्वालक्षणाव्यवहितोत्तरलक्षणवृत्तिस्वसमानाधिकरणस्वात्मकानुमितिकत्तयातज्ञानणयोस्यत्रनि
वेशः वस्तुतस्तस्वात्यत्वनिवेशारप्युत्पत्ति निवेशनप्रयोजननिर्वासत्यपेक्षाबुध्यात्मकानुव्रत्योत्पन्नज्ञानादनुमित्यामित्यनंतप्रकृषा
नरीयानुमितिसव्यवहितपूर्वोत्पन्नज्ञानानान्तरतः प्रत्यनुमितेर्वारणाय स्वसमानाधिकरणप्रमनुमितिविशेषणं एकपुरुषीयानुमि
तिविशेषणं एकपुरुषीयानुमित्यव्यवहितपूर्वोपडित्वादित्यतत्वतः प्रकृषांतरस्यानुमितिर्वारणाय सविषयकत्वनिवेशानं प्रत्ननुमि
त्यव्यवहितपूर्वलक्षणज्ञानोत्पन्नत्यनियमाशंकयाज्ञानत्वमुपेक्षितं व्रत्रीभविष्यतिचेदनुपविष्टात् बहुव्रीहिप्रतियाघसंघाग्रस्या
धिकस्यात्रनिवेशाहहुव्रीहिं परित्यज्यलक्षणं तरमाह स्वसमानाधिकरणेति प्रत्युत्पत्तिकालावच्छिन्नत्वविशेषितेनत्यनुषज्य
ते प्रत्ननुमित्यव्यवहितपूर्वोत्पन्नज्ञानादेरनुमितित्वात्तलक्षणापिसत्वात्तदनंतसमणनुमित्यत्रापत्तेः नचानुमित्यव्यवहितपूर्वलक्षणोत्पत्ति
विशेषणानयैवसामंजस्येउत्पत्तिकालावच्छिन्नत्वस्यपूर्यांविशेषणत्वमनुपपन्नमितिवाच्यं प्रव्यवहितपूर्वलक्षणोत्पत्तिविशेषणत्वेन
हुत्वकहस्त्वंशेविशेषणानयैवसामंजस्येलक्षणेस्वाधिकरणकालध्वंसानधिकरणत्वरूपस्योत्पत्तिघटकांशस्यवैयर्थ्यापातात् प्रत्नाल
नाडीतिन्यायेनतदंशमपिपरित्यज्यस्वसमानाधिकरणानुमित्यव्यवहितपूर्वलक्षणवृत्तित्वविशिष्टज्ञानत्वेनकारणतासंगो प्रत्नेप्रद
र्शविष्यतेएवप्रत्ननुमितेःसामानाधिकरण्यविशेषणप्रयोजनंपूर्ववत् प्रत्ननुमित्यव्यवहितपूर्वत्वंप्रागभावसत्येतत्प्रागभावाधिकरण
क्षणप्रागभावानधिकरणत्वेसतितत्प्रागभाववत्वं प्रत्ननुमितिपूर्वविनष्टस्यतद्व्रत्योत्पन्नस्यचघटज्ञानादेर्वारणायदलद्वयस्वाव्यव
हितोत्तरत्वघटकेस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपसत्यंतनादेतदीयसत्यंतस्यसार्थकत्वादप्येनतत्लक्षेलाघवं
बोध्यं प्रागभावानंगीकर्तृमतेतुघटितंपूर्वत्वमात्राव्यवहितपूर्वत्वमेवनिवेशं प्रत्ननुमित्यव्यवहितपूर्वोत्तरत्नतदुत्तरस्यापिस्थूलकालेप्र

नुमितेस्तन्नरान्यनरस्य घटादिज्ञानस्य वारणाय तत्क्षणत्वनिवेशनं प्रागनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपदं कालपरमेव अ
नुमित्यव्यवहितपूर्वक्षणपर्यन्तस्थायिनस्तत्पूर्वजातघटज्ञानादितोऽनुमितेः पूर्वं नुमित्यवारणायोत्पन्नत्वनिवेशने पूर्ववह्न्यादि
वारणाय स्वविषयकत्वनिवेशनं ज्ञानत्वोपात्तायाश्चापि पूर्ववद्दोषं अत्रोभयत्र स्वत्वं च घटितत्वेन नन्वव्याप्तिविरहायादननुगमर
तिप्रतियोगिनि स्वत्वमंतर्भाव्यानुगतभेदकूटघटितत्वेन धर्मिणः कारणताप्रसंजयति स्वक्षणेति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्व
समानाधिकरणानुमितिकत्वं अनुमितिसामग्रसमवधानक्षणोत्पन्नघटज्ञानादिकमेव तदन्यस्वविषयकानुमित्यव्यवहितपूर्वक्ष
णोत्पन्नतत्समानाधिकरणपरामर्शादितोऽनुमित्युत्पत्तेः तादृशादेव परामर्शादनुमित्यनंतरमनुमित्यवारणाय अत्राप्युत्पत्तिका
लावच्छिन्नत्वविशेषितेनेत्यनुषज्यते नचैवं सोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनि निवेशनानुगमस्यावश्यकतया प्रयासोपफल
इति वाच्यं तत्तद्व्यक्तित्वतदधिकरणसमयध्वंसाधिकरणसंबंधानामभावकूटविशिष्टत्वस्यैवोत्पत्तिकालावच्छिन्नत्वार्थत्वात्
तादृशस्य चानुगतत्वात् स्वसमानाधिकरणानुमितिनावच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वविवक्षणे परमतोऽनुमि
त्युत्पादकपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्य तत्परामर्शसामानाधिकरणकालान्तरीणानुमितौ सत्त्वेऽपि भजन्यस्वविषय
केऽभेदकूटाप्रसिद्धिः स्वक्षणाव्यवहितोत्तरत्वं पूर्वनिरुक्तं ग्राह्यं तस्मदीययादृशघटज्ञानानन्तरं तदीयानुमितावनुत्पन्नायामेव
तस्यध्वंसोत्पत्तिस्तादृशमेव घटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणोत्पत्तिकसमानाधिकरणानुमितिसामान्यकामिनिपराम
र्शसमवहितात्तदन्यघटज्ञानादितोऽनुमित्यापत्तिरतस्स्वपदेनोपादानासंभवादतो व्यवधाननिवेशः निरुक्ताव्यवधानस्यानुमि
त्यनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नाया अप्यनुमितेरुत्पत्त्यधिकरणक्षणाव्यवहितोत्तरत्वस्य तादृशानुमित्युत्पत्तिमतितादृ
शघटज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकाले सत्त्वात्तादृशांशस्य प्रसिद्धमेव स्यात् अतउत्तरत्वक्षणत्वयोर्निवेशनेऽनुमितेः र
स्वाव्यवहितोभयक्षणवृत्तित्वात्मकानुमितिकतया स्वपदेनोपादानासंभवात्ततोऽनुमित्यंतरापत्तिरतउत्पत्तिनिवेशः व्यधिकरणानु

ग॰
दी॰

मित्यव्यवहितपूर्वोत्पन्नचैत्रज्ञानादिवारणाय सामानाधिकरण्यमनुमितिविशेषणं द्वितीयकल्पेऽनुमित्यव्यवहितपूर्वक्षणावृ
त्तित्वोपलक्षणीभूतस्य पृथगुत्पत्तिकालस्य विशेषणतया निवेशाये तदव्यावर्त्यं दर्शयति यत्र चैत्रकत्वादशक्षणावृत्तित्वस्य विशेषणत
या निवेशनमेवोचितं तावतैवातिप्रसंगभंगादित्याशयेनाह किंवेति पदव्यावृत्तिः स्फुटैव यो दृश्यपरामर्शाद्द्वितीयक्षणे किमपि
ज्ञानं नोत्पन्नं तत्तृतीयक्षणे वानुमितिजातीपरामर्शाद्यपत्तानस्यैवानुमित्यव्यवहितपूर्वक्षणावृत्तित्वविशिष्टत्वादनुमित्यव्यवहित
30 प्राक्क्षणोत्पत्त्वात् ज्ञानत्वरूपेत्यस्य सविषयकत्वनिवेशमफलमित्यत ज्ञानत्वमेवास्तु निवेशनीयं तत्राह योगिनि स्वतो न भावनाजन्म
ज्ञानाशनीयः पूर्वकल्पद्वयेपि तत्सत्वात् गौरवस्य चाधिक्यात् अननुगमात् अननुगमासहिष्णुतायां तत्तद्व्यक्तिघटनं तद्धत् समाना
धिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणसंबंधानामभाववत्कूटविशिष्टज्ञानत्वेन कारणत्वप्रसक्तिर्वाधानचोपदर्शितसकलरू
पपेत्तयालिंगपरामर्शत्वस्य लक्षणतया तेनैव रूपेण परामर्शहेतुत्वमुचितमिति न प्रतिबंधकत्वशंकानिवाच्यं उक्तरूपेण हेतुत्वे
कारणतावच्छेदकशायामुक्तरूपावच्छिन्नविरहेणैवानुमितिवारसंभवात्कारणतया कल्पनीयत्वात् लिंगपरामर्शत्वामेव
यात तद्वरीगौरवस्याकिंचित्करत्वात् ननु यत्र पदज्ञानादि द्वितीयक्षणे लिंगपरामर्शस्तदुत्तरमनुमितितत्र परामर्शोत्पत्तिक्ष
णेपि अनुमितिप्रसंगः प्रथमक्षणमपेक्ष्य द्वितीयस्यैव द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वेनानाहूशचैत्रज्ञाना
देः स्वक्षणाव्यवहितोत्तरक्षणे त्वनुमितिकत्वादितत आह अव्यवहितोत्तरत्वं निद्वितीयपदक्षणा इति अव्यवहितोत्तरत्वमथ स्वक्षण
ध्वंसप्रागभावात्मकरूपेण निवेशः किंतु स्वाधिकरणकालत्वेन तथा च स्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभाव स्वक्षणवृत्तीय
क्षणोऽसत्वात् न तस्याव्यवहितोत्तरत्वमिति भावः पूर्वकल्पत्रपेक्षानरूपेत्यस्य सविषयकत्वविशेषणप्रयोजनं स्फुटयितुमाशंक
ते न चाद्विमे विति शेषकल्पेवि नश्यदवाश्यपरामर्शजन्यानुमितिस्थलेपि व्यवहितपूर्वक्षणावृत्तित्वविशिष्टस्य परामर्शस्यैवानुमि
त्यव्यवहितपूर्वपक्षेण सत्वात् ज्ञानउपयनिविस्यत आदिमे चित्स्नं अनथात्वादिति द्वितीयक्षणे अनुमित्यनुत्पत्तानत्कारणतावच्छेदका

नांक्रान्तत्वादुत्पत्तिकालावच्छिन्नस्यानुमितिव्यवहितप्राक्क्षणे सत्त्वाच्चेत्यर्थः अत्रानुमित्युत्पत्तिक्षण इत्यादर्शितस्थले अनुमिति
एवं मध्ये परामर्शे न प्रतिबंधाद् उच्च च सामग्र्यादिनोत्पन्नमर्हतीति शंकानिरासायानुमितिसामग्र्या विरोधिन्याविरहे ऽशेति प
रामर्शमात्रे न प्रतिबंधकमपि त्वनुमितिसामग्र्येव तदा न तत्सामग्रीनस्याः फलव्यवहितप्राक्कालपूर्वसत्त्वादिति न तदानीमाह
प्रत्यपरामर्शद्वितीयक्षणेऽनुव्यवसायादेरित्यादिना सन्निकृष्टवस्तुतरज्ञानपरिग्रहः नत्वपत्र परामर्शोत्पत्तिकाले समानविष
ये लौकिकचाक्षुषादिप्रत्यक्षस्य भिन्नविषये च शाब्दबोधस्यापि तत्र द्वितीयदाने विनिगमनाविरहेण किमपि ज्ञानं न जायते
सकलज्ञानसामग्रीषु प्रतिबंधकसमवधानस्यानुल्पत्वाद् तत्र द्वितीयक्षणे प्रत्यक्षादिसामग्रीविरहेपि तृतीयक्षणे नानुमितिः
स्यात् उक्तकारणतावच्छेदकाक्रान्तज्ञानाभावादित्यत आह अनंतरेति कथंचिज्ज्ञानान्तरोत्पादेपीत्यर्थः संस्कारादितित स्यापि वि
षयकत्वघटितत्वेन तत्कारणतावच्छेदकाक्रान्तत्वादिति भावः नच परामर्शादिरूपेतदात्मकतत्रकारणताविनिवाच्य फला
नुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वेन परामर्शादिरूपेतत्त्वस्यैवासिद्धेः ननु अनुमितेः संस्कारजन्यत्वोपगमे तस्याः स्म
तित्वापत्तिः संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादत आह संस्कारजन्यत्वेनेति निरासादिति संस्कारत्वेन संस्कारजन्य
त्वस्यैव स्मृतित्वप्रयोजकत्वात् अन्यथा कालोपाधिविषयज्ञानानां तेषांपि ज्ञानमानलिंगकरणनामने संस्कारलिंगकानुमितौ
संस्कारस्य हेतुत्वेन निप्रसंगादिति भावः प्रकृतसामग्र्यापकार्यानुत्पत्तिनिर्वाहकतावच्छेदकरूपेण प्रतिबंधकत्वमेव प्रसंजयति समा
नाधिकरणेति पदव्यावृत्तिमनुमितिव्यवहितपूर्ववर्तिनि सिद्धिभिन्नास्मिन्नभावपक्षतावच्छेदकासिद्ध्यात्मकपरामर्शान्तरे सिषा
धयिषोत्पत्तिकाले सर्वत्र न तदात्मसमवेतधर्मनाशस्याप्रामाण्यकत्वे यत्र न तत्राशक्तत्वप्रथमं प्रतिबंधकतावच्छेदकावच्छिन्न
स्यासत्त्वेनातिप्रसंगसंभवात्कल्प्यांतरमाह समानाधिकरणेति उक्तस्थले परामर्शादेरनुमितिव्यवहितपूर्वक्षणवृत्तित्वेपि त
दुत्पत्तीदेतरस्य अनुमितिव्यवहितपूर्वत्वानधिकरणतया न तत्त्वविशिष्टत्वेन परामर्शादेरेव प्रतिबंधकत्वादात्र कल्पना

31

दशायस्थलेसिषाधयिषोत्तरकालेऽनुमितिप्रसंगादितिभावः अत्रानुमितेरव्यवहितपूर्ववृत्तित्वं वक्ष्यमाणस्तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रति
योगित्वं अत्रक्षणत्वानिवेशेऽनुमित्युत्पत्त्यधिकरणमहाकालीयोत्पत्तिकध्वंसमादाय क्षणमात्रस्यैवाव्यवहितपूर्वत्वं स्यादिति क्षण
त्वनिवेशनमावश्यकं एवं च तदपेक्षया लाघवात् अनुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वविशिष्टत्वं प्रतिबंध
कत्वमेवोचितं अनुमित्युत्पत्त्यनधिकरणत्वेनानिवेशेऽपि क्षतिविरहात् अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पन्नध्वंसप्रतियोगित्व
स्यानुमित्यव्यवहितपूर्वक्षण एव सत्त्वाच्चरणप्रत्येकक्षणत्वनिवेशने चोभयत्रैवावश्यके अनुमित्यव्यवहितप्राक्क्षणेऽपि तदुत्पत्त
क्षणोत्पत्तिकध्वंसप्रतियोगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्त्वेनानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थू
लकालविशेषवृत्तित्वविशिष्टसत्त्वेन चानुमितिमात्रानुपपत्तिरित्याशयेनाह स्वसमानाधिकरणेति यदि च पूर्वकल्पे क्षणत्वा
निवेशेऽनुमित्युपलक्षितकालोत्पत्तिनिवेशनपवान्यकालावच्छेदेनापत्तस्य द्वितीयोत्पत्तौ अन्वयः नुमित्युत्पत्त्यधिकरणमहाकाला१
कोत्पत्तिकध्वंसमादायातिप्रसंगः न तु तदुत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशे तथा च क्षणत्वमनुत्पत्त्यधिकरणकालेनानिवेशमेवेऽस्तु च्य
नेतथापि पलात्तितोत्पत्तिकत्वापेक्षया तदुत्पत्तिविशिष्टोत्पत्तिकत्वस्य गुरुशरीरतयैव कल्पांतरानुसरणसंगतिः न चैतत्कल्पेऽप्यनु
मित्युत्पत्तिविरहविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्य अनुमित्युत्पत्त्यधिकरणाभिन्नोत्पत्तित्वानिवेशे यत्रानुमित्यात्मकपराम
र्शानंतरं जातानुमित्यंतरेच्छावलात् अनुमित्सोत्पादककालस्य तत्पूर्वपरतो वा वस्थानावश्यकतया अनुमित्युत्पत्त्यधिकरणत्वनि
यमेन प्रथमानुमित्युत्पत्तिक्षणस्यानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगित्वायाऽदुर्घटं तत्र अनुमित्सोत्पादकालेऽप्रम
उत्पाद्यमनंतरानुमित्युत्पत्त्यभावोपलक्षितसमयोत्पन्नकत्वनिवेशे अनुमित्यव्यवहितप्राक्क्षणस्यापि तदुत्पत्त्यभावाधिकरणस्थूलका
लोत्पत्तिकध्वंसप्रतियोगितयानवृत्तिपरामर्शादनुमितिविरोधितापत्तेस्तथावसाम्यमिति वाच्यं तादृशकक्षणाभ्युपगमे अनुमित्यु
त्पत्त्यनधिकरणत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽपि दर्शितस्थलेऽनुमित्योत्पत्तिक्षणस्यानुमित्युत्पादानधिकरणतयोक्तदोषा

नवकाद्यादेतत्कल्पे लाघवसंभवात् अनुमित्यनधिकरणत्वस्य समयविशेषणत्वेऽनुमित्युत्पत्तिक्षणस्यापि अनुमित्यधिक
रणसमयविशेषणप्रवेशे वाव्यवहितपूर्ववत्तया तदुत्तरमनुमित्यापत्तिरतस्तदुत्पत्त्यनधिकरणत्वपर्यन्तनिवेशः समयाव्यव
हितपूर्ववत्तया तदुत्तरमनुमित्यापत्तिरतस्तदुत्पत्त्यनधिकरणत्वपर्यन्तनिवेशः समयाव्यवहितपूर्ववत्त्वसमयोत्पत्तिकध्वं
सप्रतियोगित्वमेव न तु वक्ष्यमाणं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वेन तदुत्पत्तिक्षणनिवेशे प्रयोजनाभावात् प्रागभा
वानभ्युपगन्तृनयेन तदुत्पत्तिकालीनध्वंसप्रतियोगित्वं तत्पूर्ववत्त्वं तथा च तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तिध्वंसाप्र
तियोगित्वरूपाव्यवहितत्वस्य समानत्वेन निवेशानं सफलं तदुत्पत्तिकालीनत्वस्थाने तदुत्पत्तिकालोत्पत्तिकत्वनिवेशान
पवव्यवहितपूर्वकालवारणसंभवादित्याशयेनानुमित्यव्यवहितपूर्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेव
वाच्यमित्याह तदव्यवहितेति अनुमितिस्थितिक्षणोत्पन्नध्वंसप्रतियोगित्वमनुमित्युत्पत्तिक्षणसाधारणमतस्तद्वृत्तित्वविशिष्टस्यावि
रोधित्वोपपन्नये प्रथमोत्पत्तिनिवेशः उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशे तल्लाभायैव क्षणपदं द्वितीयकल्पानुसरणे बीजभूतं प्रथमक
ल्पदोषं कथंचिदुद्धर्तुमाशंकते नन्वात्रेति सिषाधयिषोत्पत्तिकाले कस्यचिन्नदा महतिधर्मस्य नाशेन स्यैवानुमितिपूर्ववर्तिभिन्नत्वेन वि
रोधितया तत्सिषाधयिषोत्पत्तिकालेऽनुमित्यापत्तिसंभव इति तद्विनाशस्थलानुसरणं अन्यदीयधर्मनाशे यत्नेन तद्धर्मेणाप्रत्यासन्नत
या अन्यदीयानुमितिप्रतिबंधकत्वासंभवात् स्वकीयस्य तूक्तं यद्यपि परामर्शानन्तरं सिषाधयिषोत्पत्त्यादस्थले परामर्शाव्यवहितप्राक्
क्षणे फलेच्छाया अवश्यमेव स्वीकार्यतया तथा च तस्या एव सिषाधयिषोत्पत्तिकाले अवश्यं विनाशः तथाप्येतादृशध्यात्मकफलज्ञानाय
दिपरामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते तदा परामर्शोत्पत्तिद्वितीयक्षणे काले आत्मधर्मविनाशेन संभवतीत्यभिप्रायेणाह इदं त्र
नुमितौ स्थायित्वभ्रमदशायां फलानन्तरेच्छासंभवेन नैव स्थायित्वप्रकारेणानुमितीच्छा संभवतीत्यभिप्रायेण वा सिषाधयिषानन्तरमनुमिति
रित्युक्तं प्रागनवरतेति अनवरतपरिस्पंदमानानामनेकानां परमाणूनां चेतनेनात्मना संयोगः संयोगसंतानः संयोगधारा तदंतर्गतव्य

ग॰
दू॰

32

क्षीनां प्रत्यक्षाणामेव नाशादित्यर्थः अपरिमितानामपि घटादीनामिव स्थिरत्वे सदागतिस्वभावानामपि पक्वाद्यादिरूपत्वेन प्रतिक्षणं संयो
गोत्पादविनाशसंभव इत्यपरिमितानां प्रतिक्षणमात्मसंभवेन्न संयोगादिनाशस्य संभवेप्यन प्रामाणिकत्वेत्याशंक्याह स्थूलानन्यादिनिक
ल्पनासंभवादिति अनुमितिसमुत्पन्ने द्वन्द्वकारणसत्त्वस्यावश्यकतया तदनुत्पादस्य तादृशसंयोगादिनाशमंतरेणानुपपद्यमानत्वान्न इति
भावः ननु तत्रानुमित्युत्पादस्य तादृशसंयोगादिनाशमंतरेणानुपपद्यपर्वीहायास्मिन्नभावादिरूपकारणांतरमेव कल्प्यतां नादृष्टविरहेणापि
तत्र तदुपपन्नेरित्यत आह कारणांतरेणेति नन्वनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्य कारणताग्रह एव न संभवति उक्तस्थले
अनुमित्यनुत्पादनिर्वाहाय तादृशकारणाभावोपपादकसंयोगादिनाशः कल्पनीयः प्रथसंचनातादृशकारणताग्रह एव न संभवति उक्त
स्थले तदानीं तादृशाभावरूपकारणसत्त्वस्य संदिग्धतयान्वयव्यभिचारसंदेहादित्यत आह अन्वयव्यभिचारेति कारणताग्रहाविरोधि
त्वादिति कारणतायाः कार्यव्यापकतागर्भाया ग्रहे ग्राह्याभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात् सामग्रीनिष्ठका
र्यव्याप्तेस्तु कार्यकारणभावाघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्यकारणभावग्रहविरोधित्वे मानाभावादिति भा
वः ननु प्रतिक्षणमात्मनि संयोगादिविनाशोपि यत्र दर्शनस्थले सिद्धिरनुमितिरूपा तत्र द्वितीयक्षणे विनष्टसंयोगादेरनुमितिपूर्वमपि स
त्त्वेनाविरोधितया उक्तापत्तिस्तदवस्थैवेत्यत आह उपादीयमानेति प्रतिबंधकतया लौकिकयतानामित्यर्थः स्वरूपविशेषः यदायदानत्रा
त्मन्यनुमितिर्नोत्पद्यते तत्क्षणाव्यवहितपूर्वक्षणोत्पन्नसंबंधस्यानुमित्यव्यवहितपूर्वमभावात् एवं च स्वनिष्ठप्रतिबंधकताया स्वरूपसं
बंधेनैव वाच्या सर्वत्र क्षणविशेषसंबंधस्यैव प्रतिबंधकतासंभवेन सिध्यादिसाधारण्याभावेपि न क्षतिः क्षणसंबंधस्य स्वरूपातिरिक्तत्वा
भिप्रायेणानुगतेन भेदकूटाघटितेन लक्षणेनैव कारणतां प्रसंजयति भवेद्वेति एकपुरुषीयानुमित्स्याद्क्षणे [illegible]नामनुमित्याप
त्तेर्वारणाय तत्र तत्पुरुषीयत्वनिवेशः क्षणस्य कारणता च पक्षाशाद्दृशात्क्षणस्तदुत्तरं कार्यमिति कालिकप्रत्यासत्त्याबोध्या परामर्शसाधारण्य
नुरोधेनाह तादृशेति तदीयानुमित्यव्यवहितपूर्वेत्यर्थः यद्यपत्पुरुषीयदर्शितस्वसामानाधिकरण्यवस्यानुमितिविशेषणतयाप्यतिप्रसं

गः शाक्यवारणायापि तत्र स्वतन्त्रतद्भावेनानुगमासार्थक्यतत्त्वरूपधीयत्वत्वघटितैतत्कल्पानुसरणं बोध्यं न चैवं प्रकारभेदेन कारणताभेदात् सा
मानाधिकरण्यप्रत्यासत्त्या लिंगपरामर्शत्वासिद्धिर्भावत्वादिना कारणताकल्पनमेवोचितमिति वाच्यं लिंगपरामर्शादेरपि लिंगभेदेन
कारणताभेदस्यावश्यकत्वात् प्रकृष्टापेक्षया लिंगादीनामेव भूयस्त्वात् उक्तरूपेण कारणतास्वीकारे निष्टंकं प्रदर्शयति तथा चेति उप
मानादीत्यादिना शब्दपरिग्रहः प्रमाणान्तरत्वमनुमानाद्वहिर्भूतप्रमाणत्वं सर्वत्रैवेति उपमानादिस्थले लिंगपरामर्शादिघटितानुमि
तिसामग्र्यनियमात् तत्र प्रमित्यन्तरमुपेयते अतो मानादेः प्रमाणान्तरता अनुमित्सानुत्पत्तिमात्रनिर्वाहस्योक्तकारणस्यानुमितिमिसामग्रीत्वे
तस्याः सर्वत्रैव सत्त्वेन उपमित्यादिरूपविलक्षणप्रमितेरेव अप्रसिध्या प्रत्नैरिति भावः ननु सर्वत्र एकजातीयप्रमितिसामग्रीसंभवेपि
उपमिणोमि शृणोमि अनुमिनोमीत्यनुभवसाक्षिकं प्रमितिवैलक्षण्यं एण्डरपञ्चवमेवेति नोपमानादेः प्रमाणान्तरताभंग इत्यतो अन्यदपि
ष्टमाह विलीयेतेति उक्तरूपेण परामर्शादेरपि कारणत्वात् परामर्शत्वादिनेति अनुमित्यव्यवहितपूर्ववर्तिभिन्नत्वादिना वादान्तरेऽपि
प्रतिबंधकत्वाद्बाधत्वादिनेति कार्यान्तरेण प्रत्यक्षादिजकारणानां सर्ववादिसिद्धतावच्छेदकेन्द्रियसन्निकर्षत्वाद्यवच्छिन्नानां प्रतिबंधका
नां सर्वसंमतप्रतिबंधकत्वावच्छेदकदोषविशेषत्वाद्यवच्छिन्नानामतथात्वमकारणत्वमप्रतिबंधकत्वं चाल्पानां अकारणत्वादिना स
र्वानुमतानां कार्याव्यवहितपूर्ववर्तिभिन्नानामुदासीनवस्तूनां तथात्वे कारणत्वादिकं प्रसज्यत तथा मन्मुक्तकारणत्वाद्यवच्छेदकादिरूपा
क्रान्तत्वादिति भावः अत एवेति अनुमित्यव्यवहितपूर्वावृत्तिसिद्धिभिन्नसिद्धानां तन्निष्ठानिरूपितवावच्छिन्नाभावस्य हेतुत्वे अनेन कारणता प्र
संगात् नाह्यासिद्धिभिन्नासिद्धत्वावच्छिन्नाभावहेतुत्वे तस्यानुमित्स्यानुत्पत्तीनतया अन्योन्याश्रयात् नत्रासिद्धिभेदकूटवत्सिद्धतावच्छिन्ना
भावहेतुत्वे भेदानां विशेष्यविशेषणभावे विनिगमनाविरहादेवेत्यर्थः एतन्मतेऽपिकदूषणमाह वैयर्थ्येति अनुमित्याव्यवहितपू
र्ववर्तिभिन्नत्वावच्छिन्नाभावस्यैव कारणत्वसंभवात् बाधबुध्यादेरभावस्य परामर्शादेः कारणत्वांतरविलयप्रसंगस्येष्टत्वादिति भावः
एतन्मतेनावदर्शितत्तृतीयलक्षणसाधारण्याव्यवहितोत्तरत्वघटितस्वलक्षणाव्यवहितोत्तरत्वोत्पत्तिकानुमितिभिन्नासिद्ध्यभावरूपपक्षता

ग० ८

33

पक्षेऽपि पूर्वोक्तासिद्धिपदपदव्यावृत्त्यसंगतेस्तद्वैयर्थ्यं बोध्यं न च ज्ञानेच्छयोर्योगपद्येऽस्मात् सिषाधयिषाकालोत्पन्नानुमितिः सर्ववर्तिपरामर्शादेः सि
षाधयिषाविरहविशिष्टाव्यवहितोत्तरक्षणोत्पन्नानुमितिकाभिन्नत्वेन तया पूर्वोक्तसिषाधयिषाविरहविशिष्टतया चानुमितिविरोधिता स्यादिति
तत्सार्थकत्वमिति वाच्यं ज्ञानेच्छयोर्योगपद्ये सिद्धत्वया वानेऽपि यत्र पूर्वोत्पन्नसिषाधयिषा चतुर्थक्षणे सिध्यनन्तरं पुनः सिषाधयिषाऽनुमिति
स्तृतीयक्षणोत्पन्नसिद्धेर्विरोधित्वाय तन्नैर्दुर्वारत्वात् न च तत्र सिध्यनुत्पादेनासिसाधयिषाविरहविशेषणस्यापि वैयर्थ्यमापतितं यत्र क्रमेण सि
द्धिसिसाधयिषानुमितिः पश्चात्तत्र सिद्धेरनुमित्यविरोधित्वेऽपि सिषाधयिषोत्पत्तिकाले विनष्टफलेच्छादीनां विरोधित्वनियेव सिषाधयिषोत्प
त्तिक्षणेऽनुमितिवारणासंभवादिति वाच्यं सिद्धेरनुमित्युत्पत्तेरिच्छाकालविनष्टस्य फलेच्छादेरनुमित्यव्यवहितपूर्ववर्तितया विरोधित्वा
संभवादिति समानविषयप्रत्यक्षादिसामग्रीकाले पक्षताविरहेणानुमितिवारयतो मूलस्थसाधकमानपदं सिद्धसाधकमानविशेषान्यत
रपरतया वर्णयतरुपाध्यायस्य मतमाह सिषाधयिषेति सिंषाविव साधकमानेऽप्यनुमित्सायाः उत्तेजकत्वात् प्रत्येकं तदभावविशेषणत्वे गौ
रवमित्यन्यतरत्वावच्छिन्ने सकृदेव विशेषणत्वलाभाय समासमुपेत्तितः अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्वात्
सिषाधयिषां विना कदाप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमानविशेषणं साधकपदार्थघटकसिंषावदनुमित्सान्यत्वविशेषणं
पर्यवसितं रूढं च लाघवमाशंक्याग्रे निराकार्यं साधकमानपदार्थविनिर्वाहद्वयमिति साधकं हीति तदुपहितं स्वजन्यसिद्धिविशिष्टतत्साम
ग्रीसिद्धकारणसमुदायाः अनुमित्सासत्वे तदभावविशिष्टपृथक्सानाभावस्यात्तत्वात् विनानुमित्सामिति अनुमित्यभावप्रसंगादिति
कालिकप्रत्यासत्त्याप्रतिबंधकत्वाभिप्रायेण समवायेन प्रतिबंधकत्वे अनुमत्यत्रे प्रत्यक्षइतिदोषः ननु तत्रानुमितिनिवारणाय अन्यदेव
प्रतिबंधकमास्थेयं सिंषाभावपक्षतामतेऽपि तदा च प्रत्यक्षापत्तेरिति भावः प्रत्यक्षसामग्र्यभाववत्वे नासिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन
अन्योन्याश्रयादिति अनुमितिसामग्र्यभावप्रत्यक्षकारणकलापगतमज्ञात्वा प्रत्यक्षसामग्र्यज्ञानात्तदज्ञाने च तदभावघटितानुमिति
सामग्र्या अज्ञानात्तदभावाज्ञानादिति भावः अथवा कारणसमुदायत्वेन सामग्र्याः निवेशे समुदायभेदस्य प्रत्येकं सकलकारणेष्वेव सत्वात्

व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावानभ्युपगमे सामग्र्यां सामग्रीभिन्नाभिन्नत्वं चेदनुमितिकार्याव्यवहितप्राक्क्षणावच्छि
न्नत्वेनैव सामग्रीनिवेशापत्त्या व्यासज्यवृत्तिधर्मावच्छिन्नभेदस्याप्यव्याप्यवृत्तिताभ्युपेयेति अन्यदा कार्याव्यवहितप्राक्क्षणावच्छिन्नभे
दवत्त्वं कार्याव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्वं फलोपधायकस्य उपपादनीयं तथा च परामर्शादिसत्त्वे प्रत्यक्षोत्प
त्तिकाले अनुमितेरनुत्पादः प्रत्यक्षोत्पत्तिर्निर्वाह्य इच्छाऽनुमितिप्रतिबन्धकत्वस्य प्रत्यक्षोत्पत्तिमन्तरेणानिर्वाहात् प्रत्यक्षोत्पत्तिर
प्यनुमित्यनुत्पादमपेक्षते तदुत्पादे अनुमित्यव्यवहितप्राक्कालावच्छिन्नस्य प्रत्यक्षप्रतिबन्धकस्यावश्यं सत्त्वात् अन्यथान्याश्रय
इति भावः अत्रैव कल्पे अन्येषां दूषणानुपपत्तिस्थाने तत्त्वाभावेति स्फोटन्ति दोषस्यापि तदनुमननपाचकार संगतियत्र विशेषदर्श
कत्वादिति तत्राह अनुमानातिरिक्तेति तथा सति प्रत्यक्षशरीरे अनुमानातिरिक्तासाधकमानान्तर्भावस्य निष्फलत्वादित्यर्थः
सिद्धासमवहितसामग्रीदशायामनुमितिनिवारणस्यैव तत्फलत्वात् साधकमानपदेन सिषाधयिषाविरहितव्यवच्छेदे च तदनिर्वाहादिति
भावः केचित्तु यथाश्रुतानुरोधेनानुमानातिरिक्तेति पदं तन्मात्रपरमेव न च सामग्र्याः पृथक् प्रतिबन्धकत्वे साधकत्वे साधकमा
नपदार्थस्य सिषाधयिषाविरहितस्यापि निवेशनमफलमेवेति वाच्यं यत्र विषये प्रत्यक्षसामग्रीसहिते सन्निकर्षादिघटितप्रत्यक्षादिसामग्री
दशायामेव परामर्शादिसमवधानं तत्रानुमितिनिवारणाय तादृशसाधकमानस्यैव प्रत्यक्षतायां निवेशयितुमुचितत्वात् न च तत्रा
पि सिद्धिप्रतिबन्धकत्वेनैवोपपत्तौ सिषाधयिषाविरहितनिवेशनमफलमिति वाच्यं प्रागुक्तसिद्धिकाले प्राक् ज्ञानं जायतामितीच्छाबलाद
नुमित्युपपत्तये सिद्धौ तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात् तथाविधेच्छाबलादुपदर्शितप्रत्यक्षसामग्र्यनन्तरमनुमितेर्वार
णाय साधकमानान्तर्भावस्यावश्यकत्वात् न च सिषाधयिषाविरहितवह्निसंयोगादिसत्त्वे आलोकसमवधानाय सत्त्वेन तादृशेच्छाबलादनुमि
त्यां साधकमानेऽपि तादृशेच्छाया उत्तेजकताया आवश्यकत्वात् प्रत्यक्षतायां तत्त्वं नाभविष्यदनुमितिनिवारणासंभव इति वाच्यं यत्र विष
यविशेषे प्रत्यक्षोपहितचक्षुःसंयोगादिसत्त्वे इतरकारणसमुदायप्रवाहात् ज्ञानं जायतामितीच्छानन्तरं इतरकारणाभावविशिष्ट

ग॰
दू॰

34

तादृशचन्द्रःसंयोगादिसत्वेतत्रतादृशेच्छाभावस्यप्रत्यक्षोपहितचन्द्रःसंयोगादिरूपसाधकमानाविशेषणत्वानुपगमात् तादृशवि
षयविशेषीयपक्षतायामेवतथाविधसाधकमानांतर्भावस्यसार्थक्यादितिभावःइत्याह अनुमितिसामग्र्यभावत्वेनप्रत्यक्षकारणत्वमि
तिअन्यथाअनुमित्याधीनानुमितिस्तुत्याद्यकालेनिसामग्र्येनप्रत्यक्षकल्वेननिरस्तावादित्यतआहवस्तुतस्त्वितिस्वतंत्रान्वयव्यतिरेकशालित्वमि
द्धित्वादिरूपप्रत्येकंद्रष्टत्वधर्मावच्छेदेनकार्यानुत्पादंप्रत्यन्वयव्यतिरेकानुविधायित्वंनत्वन्यतरत्वेनप्रतिबंधकत्वेपितन्निपतसिद्धित्वाद
दिवच्छिन्नस्यकार्यानुत्पादान्वयतियतत्वंतदवच्छिन्नव्यतिरेकस्यचकारणांतरपरामर्शादिसाहितस्यकार्योत्पादनियतत्वंसंभवतीत्यत
तावतासिद्धित्वादिनाप्रतिबंधकत्वासिद्धिरित्यतोहेत्वंतरमाह नियमेनेतिप्रथमोपस्थितत्वात्प्रत्येकरूपावच्छिन्नस्यतदवच्छिन्ना
न्यतरतापेक्षयाप्रथममुपस्थितत्वात्उपस्थितित्वाच्चमुक्ताशरीरलाघवमाह लाघवादिति: उक्तरूपद्वयमपिपेक्ष्यतदुभयचादित
स्याधिकभेदादिचटिततयागुरुत्वादितिभावः प्रत्येकासिद्धित्वादिनातथात्वेप्रतिबंधकत्वेअन्यथाप्रतिबंधकत्वैक्यानुरोधेननानाध
र्मावच्छिन्नानांतत्तदवच्छिन्नभिन्नत्वेनप्रतिबंधकत्वेवाधादेरित्यादिनासत्प्रतिपक्षादिपरिग्रहः अत्रैवपक्षतायामेवअंतर्भावप्रसंगा
त्तद्घटकत्वाप्रसंगात् सिद्धिबाधसामग्रीविशेषाद्यन्यतमत्वावच्छिन्नाभावस्यपक्षतात्वप्रसंगादितिसमुदायार्थः अन्यथाबाधबुध्याय
भावस्यकारणत्वांतरकल्पनापत्तेरितिभावः नचवह्न्यादिनिश्चयाप्रतिबध्यायामपिवह्निमान्पर्वतोघटवानित्याद्यनुमितौवह्न्यभावा
निश्चयस्यप्रतिबंधकत्वाद्यावद्वह्न्यादिप्रकारत्वाद्यादितद्रूपावच्छिन्नंप्रतिवह्न्यभावादिनिश्चयस्यपृथक्प्रतिबंधकत्वांतरमावश्यकमि
तिकथंसाध्यतदभावनिश्चयानामेकरूपेणप्रतिबंधकत्वाप्रसक्तिरितिवाच्यंवह्न्यादिप्रकारकानुमितौवह्न्यभावादिनिश्चयस्यपृ
थक्प्रतिबंधकत्वेपिवह्निमान्पर्वतोघटवानित्याद्यनुमितिहेतुपक्षतायांआश्रयासिध्यादिनिश्चयान्तर्भावेणैवतादृशपनिश्चयद
शायांतथाविधानुमितिवारणसंभवात् अवच्छेदकगौरवस्यभवतैवाप्रयोजकीकृतत्वान्नचतथापिबाधकालेप्रत्यक्षादेरप्यनुत्प
त्याविशिष्टवह्निसामान्यंप्रतिबाधबुद्धेःप्रतिबंधकांतरकल्पनमावश्यकमेवेतिपक्षतायांतदंतर्भावोनिरर्थकइतिवाच्यंतत्रापिभिन्न

विषयकानुमितिसामग्र्यादीनामावश्यकल्पनीयप्रतिबंधकतायां वा बाधबुद्ध्यादिसाधारण्यान्यतरत्वादेरवच्छेदकत्वे चैवोप
पत्तेर्बाधबुद्धेः सामान्यप्रतिबंधकत्वासिद्धेः प्रत्यक्षस्थले इच्छाया उत्तेजकतयापि तदसिद्धेः केचित्तु अत्रैव ईदृशप्रतिबंधकताया
यामेव प्रतिबंधकान्तरसाधारण्यान्यतरत्वावच्छिन्नप्रतिबंधकतायामेवेति यावत् अन्तर्भावप्रसंगात् अवच्छेदकघटकताम
संगात् तदभावव्याप्यवत्ताज्ञानादिसाधारण्यान्यतरत्वेनैव बाधादेः प्रतिबंधकताप्रसंगादिति समुदायार्थः तथा च पक्षतायां वा
नर्माच पक्षत्वाभावात् नोक्तासंगतिरिति व्याचक्षुः केचित्तु तदभावनिश्चयदशायां तद्धीवह्निविशेषधर्मितावच्छेदककार्यानु
मितेः कारणान्तरविरहादेव नियमतोऽनुत्पादस्तत्साध्यकस्थलाभिप्रायकमेवायं ग्रन्थः स्यात् न च सिद्धिसामग्रीविशेषयोरुभ
योरेवानुमित्साया उत्तेजकतया तयोरनुगतरूपेण प्रतिबंधकत्वे अनुमित्साविरहस्यान्यतरत्वावच्छिन्ने सत्त्वादिविशेषणतया लाघवं
अनुमित्साविरहविशिष्टसिद्धिसामग्र्यन्यतरत्वापेक्षया नाद्विशिष्टसिद्धित्वतद्विशिष्टसिद्धिसामग्रीत्वयोर्द्वयोरेकस्यापि विशेष
णस्य द्विधा निवेशेन गौरवात् अन्यतरत्वघटकाधिकांशापेक्षया सिषाधयिषाविरहांशस्य गुरुतायाः स्फुटत्वात् अतएव बाधा
द्यन्तर्भावेण प्रतिबंधेऽपि नावसरः बाधसिद्धितद्विशेषसामग्र्यन्यतमत्वेन प्रतिबंधकत्वेऽनुगतरूपावच्छिन्नांशे सिषाधयिषाविरहविशे
षणतायां सिध्यादिकालइव बाधकालेऽप्यनुमित्साबलादनुमित्यापत्तेः सिद्धित्वाद्यवच्छिन्नं प्रत्येकं पृथक् तद्विशेषणतया अलाघ
वानवकाशात् विशिष्टसामान्ययोरवादत् तदभावव्याप्यवत्ताज्ञानादीनां एकरूपेण प्रतिबंधकत्वे सत्त्वादिशालाघवसंभवेनावच्छेद
कगौरवस्य दुष्परिहरत्वात् न च प्रत्यक्षस्थले बाधबुद्धौ तदभावव्याप्यवत्तादिबुद्धौ चेच्छाया उत्तेजकतया तन्नानुगतरूपेण तयोः प्र
तिबंधकत्वे इच्छाविरहस्य सत्त्वादिशेषणतया लाघवमप्यत्रसममेवेति वाच्यं बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वेनानाप्रतिबंधक
ताप्रसंगेन तदनभ्युपगमात् अनाहार्यत्वस्य प्रतिबध्यतावच्छेदकत्वमंगीकृत्यैव बाधादिसमये आहार्यप्रत्यक्षोत्पादनीय
त्वादित्याशंकां निरस्यति न चेत्यादिना गौरवमित्यन्तमाशंका अनुमितेहृत्साद्यादिनिमित्तादिसामग्र्यसत्त्वेऽनुमित्सायामेव तादृशी

ग० द०

35

ज्ञाविषयसिद्धिरिति भावः अनुमितिविषयकेच्छाविरहस्यानुमितित्वाप्रकारकत्वांशेच्छासाधारण्यानुगतरूपावच्छिन्नविरहस्यता
दृशेच्छारूपं प्रागेवावेदितं अनुमिमनुयामित्यादावित्यन्यचो प्रत्यायितादृशेच्छाविषयसिद्धेरिति भावः अनुमितित्वादिप्रकारकेच्छा
त्वावच्छिन्नाभावस्यघटघगेवयथाभोगोसिद्धित्वप्रत्यक्षसामग्रीत्वाद्यवच्छिन्नएव नत्वनुमितित्वादिप्रकारकेच्छात्वद्प्रकारकेच्छानाम
नुगतरूपावच्छिन्नाभावएवान्यतरत्वावच्छिन्नेविशेषणं वाच्यं प्रत्यक्षादिसामग्रीदशायां मुक्तेच्छावलादनुमितेर्वारणाय वानुमि
तिभिन्नालौकिकप्रत्यक्षान्यविषयतावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनच्छाविशेषणीया अनुमितिसामग्र्या उपनीतभा
नसामग्रीसमवहितान्यत्वेनच्छाविया संग्रहाय भेदद्वयमवच्छिन्नान्तविशेषणं अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्री
समवहितेच्छया संग्रहाय यावच्छिन्नान्तं एवं वोज्ञलाघवयत्नस्समेवेत्यत आह स्वानिवर्तकेति स्वानिवर्तकत्वं विषयतया वोध्यं अप्रती
वगौरवमिति अप्रतिरूपशरीरत्वादृशेषणस्याधिकस्यानिवेशादिति भावः नन्वेवमपि प्रतिबंधकत्वेऽप्रतिबंधनलाघवं उर्वरमेव प्रति
बंधकात्वन प्रकल्प्यप्रकत्वावच्छेदकगौरवस्याकिंचित्करत्वात् अनेकत्रप्रत्यक्षताहेतुतायामेकैकविषयवत्त्वाभावादिति स्वयाना
संतर्भावेऽनंतस्थलेऽवच्छेदकागौरवात्त्वानंत्येणैकैकत्र अनिवधकताकल्पनस्योचितत्वात् यावादेः एतत्तानंतर्भावप्रतिबंधानव
काशात् फलितेवेदं रउन्नरत्वाश्वस्यासायेनान्यतरत्वेन प्रतिबंधकतामतेऽपि विनिगमनाविरहेण प्रतिबंधकताद्वयमायातदर्पितश्चान्यतरत्वे
ति अन्योन्याभावयोः सिद्धिभेदमग्रीभेदयोर्नथाचासिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नसामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदस्य
विनिगमनाविरहात् प्रतिबंधकतावच्छेदकद्वयवच्छेदकमेदात् प्रतिबंधकताभेदआवश्यकः न चतादृशभेदयोः समनियतत्वयाभे
दान्नावच्छेदकभेद इति वाच्यं तादृशभेदाभेदेऽपि तस्यासिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदत्वेन सामग्रीभेदविशिष्टसिद्धिभेदा
वच्छिन्नभेदत्वेन च विनिगमनाविरहेणावच्छेदकतायाः स्वीकरणीयतया विशिष्टावच्छेदकत्वस्यावश्यंभेदत्वेन चाखंडस्य तस्य स्व
रूपतएवावच्छेदकत्वासंभवादुक्तविशेषणपुरस्कारेणावच्छेदकत्वमिति कथं विनिगमनाविरहः इति वाच्यं अभावस्याखंडत्वेऽपि

स्वरूपतोवच्छेदकतायाःसिद्धांतविरुद्धत्वात्‌यस्यस्वरूपतोभानंतस्यैवतथावच्छेदकतायाःसिद्धान्तसिद्धत्वात्‌विशेषणप्रकारका
टेर्णप्यस्थितेःवच्छेदकत्वग्रहस्यविशेषणावच्छिन्नेऽवच्छेदकत्वावगाहित्वनियमात्स्वरूपतोभासमानेस्वरूपतोवच्छेदकत्वस्य
प्रमाणेनास्पर्शाच्चनचतद्व्यक्तित्वेनैवभेदस्यावच्छेदकत्वंनतुस्वरूपतः तथाचनोपदर्शितविनिगमनाविरहोविरहितइतिवाच्यंभेद
निष्टतद्व्यक्तित्वस्यभेदस्वरूपातिरिक्तस्यदुर्वचत्वात्‌ भेदस्वरूपस्यचतस्यस्वरूपतोनिवेशानासंभवात्‌ एतेनाखंडस्यान्यतरत्वाव
च्छिन्नाभावस्यतद्व्यक्तित्वेनैवहेतुत्वमितिपरास्तंयत्रसिद्धिभेदसामग्रीभेदयोःसामानाधिकरण्येनमिथोविशेष्यविशेषण
भावायत्रयोर्नभेदप्रतियोगितावच्छेदकतायेनाविनिगमनाविरहस्यात्‌ अपितुधर्मिविशेषणतापन्नपर्ययोरेवव्यासज्यवृत्त्यव
च्छेदकत्वंतथाविधयोरपिवच्छेदकंतदपिनमहानसीयवह्नित्वतार्णत्वादिवृत्तेर्वह्नित्वाद्येकधर्मितावच्छेदकावच्छिन्नएवमहा
नसीयत्वाद्यपरविशेषणभाननियमइत्येकत्रानेकेषामवच्छेदकत्वेऽप्येकधर्मितावच्छेदकावच्छिन्नविशेषणतापन्नस्यैवव्यव
च्छेदकत्वग्रहोननुधर्मितावच्छेदकतानापन्नस्यैनावच्छेदकताग्रहइतिनियमेनप्रकृतेकस्यधर्मितावच्छेदकतायत्रस्यवातद
वच्छिन्नविशेषणतापन्नस्यअवच्छेदकत्वेऽपविनिगमनाविरहेणावच्छेदकताभेदस्यआवश्यकत्वात्‌ अवच्छेदकविषयतावैलक्ष
ण्यस्यावच्छेदकवैलक्षण्यप्रयोज्यत्वादित्यन्यत्रविस्तारः अन्यतरत्वेनोभयोरनुगमेऽपिप्रतियोगितावच्छेदकसंबंधाननुगमान्न
योरेकाभावस्यकारणतासंभवइत्याह आत्मनिष्ठेत्यात्मसमवायसंबंधावच्छिन्नप्रतियोगिताकविध्यभावआत्मप्रत्यासत्त्यानया
कारणंप्रत्यक्षासाधारणकारणवद्दृश्यसंयोगादिरूपसामग्र्यास्तत्स्वाश्रयसंयुक्तमनःसंयोगादिरूपपरंपरासंबंधात्मकभिन्न
भिन्नसंबंधावच्छिन्नाभावस्यैवात्मप्रत्यासत्त्यानयाकारणंव्यमित्यर्थः विषयवद्दृश्यसंयोगादेःसमवायेनाभावस्यसर्वदैवात्मनिस
त्वान्नाद्दृश्याभावकारणतायाअतिप्रसंगावारकत्वादितिभावः ननुविषयवद्दृश्यसंयोगादेर्नप्रतिबंधकत्वंस्वीक्रियतेयेनसंबंधा
ननुगमःस्यात्‌ किंतुचक्षुःसंयोगादिविशिष्टस्यमनोयोगस्यैवसमवायेनप्रतिबंधकत्वंवाच्यमतआहमणीतिवह्नित्यनंतरंदाहप्रती

गा:
टी:

त्तिमनोयोगादेरिसनंतरं प्रकृतनइति च मूर्चणीयं प्रतिबंधकत्वायोगादिति मनोयोगस्यानुमितावपिहेतुत्वात्कारणस्य प्रतिबंधकत्वायो
गादितिभावः यद्यपिकारणस्यापिरूपांतरेण प्रतिबंधकत्वे तानिविरहादाह प्रतिबंधकत्वे वाक्ति:प्रयोजनविरहादेवानिवेश:प्रकृतेतु संब
36 धेकयानुरोधादेवमनोयोगादेरनुप्रवेश इत्याकिंचित्करमेतन्न तथापिमनोयोगस्याधिकस्यानिवेशनीयतया गौरवमेवबाधकं बोध्यं न च सा
मग्र्याः स्वतंत्रप्रतिबंधकतामतेपि आत्मनिष्ठतासंपत्तये च त्वक्संयोगादेःसंबंधतया मनोयोगादिप्रवेशस्यावश्यकत्वात्त्राधिक्यमेतन्म
तेपिकालनिष्ठतया सामग्र्यभावहेतुत्वस्वरूपीयत्वनिवेशस्यावश्यकतया गौरवादितिवाच्यं तथापिमनोयोगादिसंबंधस्याधिकस्य
निवेशनीयतया गौरवस्य दुर्वारत्वात् विषयभेदेन प्रतिबंधकताभेदाविरहात्तु रोपेन विषयप्रत्यासन्नतया च त्वक्संयोगादिप्रतिबंधकता
पन्नस्यैव स्वतंत्रसामग्रीप्रतिबंधकतावादिभिराश्रयणीयणोपतया तत्र मनोयोगादेर्निवेशाभावाद्यत्तथा चेतिपवरीत्या प्रतिबंधकता
वच्छेदकसंबंधभेदस्यावश्यकत्वे चेत्यर्थः पूर्वं प्रतियोगितावच्छेदकभेदेनासिद्धिसामग्रीविशेषणयोः सिषाधयिषाविरहपदार्थयोर्भेद
न्नन्निवेशनतयार्थक्यं व्यवस्थापितमिदानीं संबंधभेदेन तद्विशेषणताभेदं व्यवस्थापयति एककालेति एकक्षणावच्छिन्नमेकात्मसम
वेतत्वमित्यर्थः यद्यपि संबंधमध्ये एकक्षणावच्छिन्नत्वानंतरभावेपि सिषाधयिषाकाले तद्विरहरूपविशेषणाभावाय त्वोविशिष्टाभावो
द्तत्रएव न च कालान्तरभावे सिषाधयिषाकालेपि सिद्धौ कालांतरावच्छिन्नतद्विरहे वर्त्तमानत्वान्निरूपितरूपवैशिष्ट्यं वर्त्तते अन्यथात्मनिष्ठदादे
वत्ताद्दशविशेषणं चेतिविशिष्टासिद्धिसत्त्वमव्याहतमिति कथं विशिष्टाभावेन वर्त्तितव्यं कालान्तरभावे इति इति वाच्यं सिषाधयिषा
कारस्य तदधिकरणनिष्ठतदभावादिकरणतानवच्छेदकतया ताद्दशाधिकरणताघटितसामानाधिकरण्यरूपतदिच्छासमानाधिकरणसि
द्धिनिष्ठवैशिष्ट्यस्यानवच्छेदकत्वात् तत्कालावच्छेदेनासिद्धिसत्त्वेपि तदिच्छादिकरणे इच्छाविरहविशिष्टसिद्धिसत्त्वानुपपन्नेरन्यथा
स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणताविशेषणत्वेपि तत्कालस्याप्यन्याधिकरणावच्छिन्नाधिकरणतया[illegible]सेविरहप्रयु
क्तवैशिष्ट्यविरहस्यानिर्वाहात् विशेष्यीभूततत्तत्क्षणाधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य संबंधघटकत्वे चानुगमादि

तितथापिविभिन्नकालेविशेषणविशेष्ययोः सामानाधिकरण्यसत्वेपिपक्षतावच्छेदेनसामानाधिकरण्यस्यैवविशिष्टसत्वनि
र्वाहकत्वमित्येतत्सूचनायैवैककालावच्छिन्नत्वकथने कोचिन्न १ कालस्याविशिष्टाभावप्रतियोगित्वागितावच्छेदकत्वघटक
संबंधाघटकत्वेनइष्टमलिहितनाभावानहिविशिष्टाभाववैलक्षण्यानिर्वाहः प्रतियोगितावच्छेदकावैलक्षण्यात् सर्वदादंडरहितपुरुषा
धिकरणेदंडोपलक्षितपुरुषाभावस्यैवसत्वेनपुरुषत्वादिमात्रस्यतत्प्रतियोगितावच्छेदकत्वासंभवात् नाडुशपुरुषांतरव्यावर्त
कानुगतधर्मान्तरविरहेणसत्वेवाप्रतियोगिकोदोपलक्षितस्यापिभानेनप्रतियोगितावच्छेदकेतदंतर्भावासंभवादित्याडस्ताच्चिंत्यं
ग्रन्थादिशामिनिस्वाश्रयीभूतात्मन्युक्तपरंपरासंबंधेनसंबंद्धत्वरूपमित्यर्थः ननुपक्षताशरीरप्रत्यक्षादिसामग्र्यनंतर्भावितदभा
वस्यानुमितौस्वतंत्रहेतुताकल्पनमावश्यकंततथाचतस्यैवपक्षपदप्रवृत्तिनिमित्ततास्वीक्रियतांनतुसिध्यभावस्यातथाचपक्षप
दप्रवृत्तिनिमित्तमिदमितिमूलविरोधइत्यतआह सामग्रीतिहेतुतेयि अनुमित्यसाधारणकारणत्वेपिलाघवालिकशरीरत्वा
त् ननुलाघवस्यपक्षपदप्रवृत्तिनिमित्तत्वोपष्टंभकत्वेबाधाभावस्यैवतथात्वमुचितं १ तत्रसिषाधयिषाविरहप्रवेशात्यदिच
सिद्धसाधनस्थलेपक्षव्यवहारोनास्तीतिसिध्यभावस्यतदात्वमित्युच्यतेतदाबाधदशायामपितद्विरहात्सोपिनिवेश्यतामित्यत
आह फलानुपहितेतिस्वनिष्ठप्रसिध्यनुपहितेत्यर्थः एतञ्चेतिगौरवसूचनायासिद्धसाधनस्थलेसाध्यनिश्चयदशायांपक्षव्य
वहारविरहेणपक्षव्यवहारस्यसर्वेषांयसिद्धत्वेनगौरवादितिबाधस्थलेव्यवहारस्यविवादतयागौरवसहिष्णुतायाअत्या
ग्यत्वादितिभावः ननुसमवायसंबंधावच्छिन्नसिध्यभावस्यात्मप्रत्यासत्त्यैवानानुमितिहेतुतयास्यपक्षपदप्रवृत्तिनिमित्त
त्वेघात्मन्येवपक्षव्यवहारप्रसंगइत्यतआह विशिष्टेति १ सिषाधयिषाविरहविशिष्टेत्यर्थः एतदभिधानंचसिद्धेपक्षतानिष्ठा
यानुरूपतासंबंधेनानुमितिप्रतिबंधकत्वासंभवप्रदर्शनायपर्वतेवह्निमनुयोमित्याद्याकारकानुमित्यानामेकत्रोत्तेजकत्वेः
तिप्रसंगेनप्रत्येकमेवोत्तेजकजनतयामपक्षभेदेनकारणताभेदस्यावश्यकतयात्मनिष्ठप्रत्यासत्तेरेवोचितत्वात् अन्यथाअनुरूपविशेषा

ग॰ द॰

37

णामंतर्भावनीयतयापत्यागौरवात्ममानप्रकारिकायाः असमानविशेष्यकासिद्धेरनुमितिप्रतिबंधकतयापि पक्षनिष्ठप्रत्यासत्त्य
संभवो बोध्यः परंपरासंबंधादिति स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकवत्त्वरूपाविरपादिः न चासिद्धिकाले
पक्षेतादृशसंबंधेन पक्षे सिध्यभावो वर्तते अत्यंताभावस्य नित्यत्वादिति प्रसंग इति वाच्यं तत्र तादात्म्यवृत्तित्वविशिष्टस्यैव सिध्यभावस्य
तादृशसंबंधेन तत्तद्रूपपक्षव्यवहारनियामकत्वात् ननु विषयचक्षुःसंयोगादिरूपायाः प्रत्यक्षसामग्र्या आत्मनिष्ठ-
प्रत्यासत्त्या न प्रतिबंधकत्वसंभवः स्वरूपपरंपराया अतिप्रसक्तत्वात्संबंधत्वे मानाभावाच्च तथा च पक्षतातादृशसामग्रीतदन्यतरत्वेना-
नुमितित्वकालिकप्रत्यासत्त्यैव प्रतिबंधकत्वं कल्पनीयं तथा च प्रकृष्टांतरेतिप्रतिप्रतिबंधः स्यात् एवं कालिकसंबंधावच्छि-
न्नानुमित्साविरहस्यैव दैशिकसंबंधघटितसामानाधिकरण्यसंबंधेन सामग्र्यां विशेषणत्वं स्वीकार्यं तथा च प्रकृष्टांतरीयानु-
मित्साकालीनप्रकृष्टांतरीयप्रत्यक्षसामग्र्यास्तदीयानुमितिप्रतिबंधकत्वापत्तिरित्याशंकां वस्तुः संयोगादौ तत्प्रकृष्टीय-
त्वमंतर्भाव्यतिपकरोति पक्षस्येति अनुमित्यनुत्पादादित्यंतम् उपलक्षणं अन्यस्य प्रत्यक्षसामग्रीसत्त्वेऽन्यस्य न द्विविरहिणोनुमित्यनु-
त्पादाच्चेत्याद्यपि द्रष्टव्यं तत्तद्रूपीयानुमित्सायाः कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसंबंधेनाधिकरणयः
पः क्षणः तत्र कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसंबंधेनाधिकरणीयत्वेन वर्तमानत्वं कालीनतायाः साम-
ग्रीविशेषणं अथवा समवायावच्छिन्नप्रतियोगिताकतादात्म्यवृत्तित्वविशिष्टाभावावच्छेदकत्वे कालिकसंबंधेन वृत्तिमत्त्वमेव त-
दर्थः तेन तत्प्रकर्षीयानुमित्साक्षणस्यापि अन्यदेशावच्छेदेन दैशिकसंबंधेन कालिकसंबंधावच्छिन्नतदीयाभाववत्त्वेऽपि न क्षतिः
तत्प्रकर्षीयानुमित्सासामग्रीविशेषविरह इति १ कालिकसंबंधावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयेंद्रियसन्निकर्षविशिष्टसा-
ध्यनिष्ठेन तदीयेंद्रियसन्निकर्षादिविरह इत्यर्थः वैशिष्ट्यमेककालीनत्वमेव विशेष्यविशेषणभावे विनिगमनाविरहात् ज्ञानाका-
रणानाकलनामवतारयति दोषाय यावत्त्वेन तदसाधारणकारणसमुदायप्रतिबंधकत्वं तु नरनुपादेयमेव वत्त्वस्याद्दुर्निर्वचत्वात्

पर्वतो वह्निमानित्याद्यनुमितिसमानविषयकचाक्षुषादिसामग्र्याः प्रतिबंधकतायां रूपादिकं नांतर्भावनीयं १ तत्र साध्यपक्षयोरू-
पादिस्त्वनियमेन तन्निवेशे प्रयोजनाभावात् किंतु पर्वतो द्रव्यवान् द्रव्यं वह्निमत् द्रव्यं द्रव्यवत् इत्याद्यनुमितौ वाह्याद्यींद्रियसंनिकर्ष-
रूपाविरोधितोपपत्तये यथायोगं साध्ये पक्षे चारूपादिमत्त्वं निवेशनीयं अथ प्रतिबंधकसामग्रीमध्येपि कालेन तदनधिकरणदेशावच्छ-
च्छेदेन तदभावस्य सत्त्वात्तदनुमित्यापत्तिः न च प्रतिबंधकसत्तायाः कार्योत्पादप्रयोजकत्वात्तत्सत्त्वे कथं कार्योत्पत्तिरिति वाच्यं
सामग्र्याः कार्योत्पत्तिप्रयोजिकायाः प्रतिबंधकसत्त्वेपि तदभावसत्त्वेन तत्तत्त्वेन कार्योत्पत्तेर्दुर्वारत्वादिति चेन्न यादृशकारणताव-
च्छेदकनियमे देशांतरावच्छेदेन कार्यसमानाधिकरणकारणाभावस्य व्यावर्तके देशभेदानवच्छिन्नत्वमन्यत्राविशेषणं स्वभावेन निवेश-
नीयं यथा वा समवायादिसंबंधावच्छिन्नसंयोगत्वज्ञानादिनिष्ठकारणतावच्छेदकनियमेन तदन्यकारणतावच्छेदकावच्छिन्नस्य देशभेदा-
नवच्छिन्नवृत्तिरेवाधिकरणे कार्योत्पत्तिप्रयोजिका उक्तप्रतिबंधकाभावस्य च कारणता न तादृशी किंचिदवच्छेदेन तत्र प्रतिबंधकसत्त्व
एव कार्योत्पादात्तादृशाभावविशेषणनिवेशने प्रयोजनाभावात् तथा च न देशभेदावच्छिन्नतदभावबलादनुमित्यापत्तेनात्मनि श-
रीरविशेषावच्छेदेनासिध्यादिरूपप्रतिबंधकसत्त्वे घटाद्यवच्छिन्नतदभावबलादनुमित्यापत्तिरपि निरस्ता न च सिध्यादिर्यात्मनि न
त्कालेवा घटादिवच्छिन्नानदभावस्य वृत्तित्वात्तदन्यदेशभेदानवच्छिन्नतद्वृत्तेरप्रामाणिकतया सिध्याद्यसत्त्वेप्यनुमित्यानुपपत्तिरिति
वाच्यं १ तादृशवृत्त्यनभ्युपगमे सिध्याद्यसत्त्वदशायां तदभावस्यात्मनि देकव्याच्छ्यवृत्तितायाः सर्वानुभवसिद्धाया अनुपपत्तेः य-
दि च कायवृत्तेः स्थले पक्षतात्मनि शरीरांतरावच्छेदेन सिध्यभावादिभावस्यासिध्यादेः सत्त्वेप्यन्यशरीरावच्छेदेनानुमित्यापत्तिर्निष्ठप्रा-
माणिकी न तादृशप्रभावनिष्ठकारणतावच्छेदकनियमशरीरे यभावांशे उक्तविशेषणप्रवेशस्यावश्यकत्वात् घटादिवच्छिन्नसिध्य-
भावबलात् सिध्यादिदशायामनुमित्यापत्तेर्वारणप्रयासत्वेन तत्र मेवानुसरणीयमिति दिक् उक्तेजकाभिमतसिषाधयिषाकारण-
तांस्वीकृत्य सिध्यभावस्य कारकारणतामाक्षिपति अथेत्यादिना चेदित्यंतेन शरीरावच्छेदेनाविनासिषाधयिषां सिध्यनंतरमनुमितेर्वा-

ग॰
३८

णासंभवादिति भावः प्रतिबंदिमुत्तरयति उत्तेजकानामिति मण्यादिस्थलियोत्तेजकमंत्रौषधिविशेषादीनामित्यर्थः अननुगतत्वादि
ति तथा चाननुगतकार्यं प्रति व्यभिचारेणत्वासंभवादिति भावः इच्छायामसिद्धिस्थलेपि दर्शितं तथा चाननुगतकार्यं प्रति व्यभिचारेणा
त्वासंभव इति यादृशयादृशेच्छासत्त्वे इत्यादिनेत्यादिः सिषाधयिषा उत्तेजके भूतायादृत्यादि तथा च तत्तत्कार्य उत्तेजकाभावकूट
विशेष्यासिद्धेरभावदाहादौ मण्याद्यभाववत्त्वेन भविष्यतीति भावः ननु तावदभावकूटविशिष्टसाध्यनिश्चयाभाववत्त्वापेक्ष
यालघोपस्थितत्वात्तावत्त्वानामत्वेनैवानुगमसंभवः सिषाधयिषाणामित्यत आह सिध्यनुत्पत्त्यनुमितित्वं चेति अननुगतस्य सिद्धि
समानकालीनप्रागभावप्रतियोगित्वरूपस्यानतिप्रसक्तस्य च तत्तत्सिद्धिनाशकालीनप्रागभावाप्रतियोगित्वे सति तत्सिद्धिस
मानकालीनप्रागभावप्रतियोगितात्मकस्यैव संभवादनुगतानतिप्रसक्तोभयरूपतांतं तथा च प्रथमस्य कार्यतावच्छेदकत्वे सि
द्धान्तिधा मंत्रेण सिद्धिनाशोत्तरकाले जायमानायां मनुमितौ सिषाधयिषायां व्यभिचार उत्तरस्य तथा सत्वानंतकार्यकारणभाव
प्रसंग इति भावः सिध्यनुत्पत्तिकालीनामिति स्वक्षणवृत्तिप्रागभावप्रतियोगित्वलक्षणवृत्तित्वोभयसंबंधेन सिद्ध्यवच्छिन्नानामित्यर्थः
तावद्वा...केन मेतित्वभिन्नस्वक्षणोत्पन्नत्वोभयसंबंधेन सिद्ध्यवच्छिन्नानामित्यर्थः वैयाप्तिस्फुटैव १ संबंधविधया वक्षण
...त्वाभिधानस्वान्यानमतिबंधनोदोषः संबंधमध्ये स्वपदार्थानिवेशेपि अन्याधिकरणवृत्तित्वादेरन्यसंबंधत्वाभावेनातिप्रसंगा
विरहात् ...स्वपदार्थवि शेषणांतर्भावस्य अप्रसिद्धवारणाय आवश्यकतया अननुगमः शंक्यते तदा स्वक्षणवृत्तिप्राग
भावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसंबंधेन सिद्धिविशिष्टत्वं प्रवेश्यं नाशकाले नाशोत्पत्तिक्षणे अनुमित्युत्पादो दुर्वार इति १
सिद्धिनाशसमयोत्पन्नानुमितेरनुमित्सा सिषाधयिषाकार्यतावच्छेदकानाक्रान्तत्वादिति भावः ननु स्वक्षणवृत्तिप्रागभावप्रतियोगि
त्वस्वनाशक्षणवृत्तिप्रागभावाप्रतियोगित्वोभयसंबंधेन सिद्ध्यवच्छिन्नानुमितित्वमेव सिषाधयिषाजन्यतायामवच्छेदकं वाच्य
तस्य सिद्धिनाशकालीयोत्पन्नानुमितिसाधारण्यमेवेति नातिप्रसंगः न च सामान्यतो नाशक्षणवृत्तिप्रागभावाप्रतियोगित्वं जन्यमा

तुल्येव न संभवतीति पदाधिकरणत्वरूपत्वेन प्रागभावप्रतियोगित्वं तद्व्यक्तिनाशस्य च विशिष्य निवेशपद्धत्या न तु मतादवस्थामिति वाच्यं
संबंधानुगमस्यादोषत्वात्, कथंचिदनुगमस्यापि संभवाच्चेत्यतो दोषांतरमाह एकस्येति १ सिद्धिसत्त्व इति: अव्यवहितपूर्वे
काल इत्यादिः अनुमित्युत्पत्तिप्रसंगादिति पूर्वक्षणोत्तरोपसिध्यव्यवहितोत्तरोत्पत्तेश्च पूर्वक्षणीयानुमितेरप्रत्यक्षसिषाधयिषाध
जन्यतावच्छेदकधर्माक्रांतत्वादिति भावः १ सामानाधिकरण्यस्याव्यधिकरणस्य दर्शितकार्यतावच्छेदकताघटकसंबंधमध्ये
निवेशात् पूर्वक्षणोत्तरीयनंतरोत्पन्नानुमितौ सिषाधयिषायां व्यभिचारवारणासंभवात्, दोषांतरमाह अपि चेति सा सामान्यसा
मग्री अनुमितिसामग्री प्रत्यक्षपरामर्शादिः नतु विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्याः कार्योत्पादकत्वात् आपत्ति
विरहाशंकायामाह नहीति ईदृशेति सिषाधयिषारूपेत्यर्थः उपधायकत्वं नास्तीति नहीत्यन्वयः सिध्यसत्त्वे सिषाधयिषां विना
पि परामर्शादेरनुमित्युत्पादकत्वादिति भावः तथा च तत्रैव सिद्धिदशायामपि परामर्शादिसत्त्वे सिषाधयिषाविरहे नानुमित्यनु
त्पादप्रयोजको भावे इति पर्यवसितं नतु विशेषसामग्रीदशायां सामान्यकार्यानुत्पादप्रयोजकः सिध्यसत्त्वस्थले विशेषसाम
ग्रीविरहश्चेत्तत्स्थले तस्याश्च सिषाधयिषाविरहसहकृतसिद्धिस्थल एव सत्त्वं तत्र सिद्धिसत्त्वस्थलं इति न दोष इत्यत आह नचेति
अन्यत्रापि सिध्यसत्त्वस्थलेपि विशेषसामग्रीत्वेपि अनुमित्सोत्पत्तिकालेपि तत्सत्त्वेन तदनंतरमनुमित्यनुत्पादप्रयोजकगौरवे
च अन्यथा वहतरसामान्यकारणतायामुच्छेदप्रसंगादित्याशयः अत्राङ्गः सिध्युत्तरमनुमितौ सिध्यभावस्य हेतुत्वानरकल्पने पि
वेदर्शितप्रसंगवारणासंभवाद्विशिष्टसिध्यभावहेतुत्वमयुक्तं सिद्धिसिषाधयिषाविरहयोर्विशेषणविशेष्यभावे विनिगमना
विरहेण प्रतिबंधकताद्वयस्य तन्मते धावश्यकत्वात् प्रतिबंधकतावच्छेदकगौरवस्यादिकयत्न नचासिषाधयिषाहेतुतायां दोषि
कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिनिवेशाधिक्येन गौरवमित्याशंक्य तल्लिंगकेत्यादि विरहविशिष्टसिध्यभावस्य पूर्वोपद
र्शितसमूहालंबनजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्वसंबंधेन तादृशसिध्यनवच्छिन्नानुमितिं प्रत्येव हेतुतायाम

ग॰
दी॰

39

वत्तापिवाच्यत्वादितिसिद्धिस्थलेविनापिसिषाधयिषांसामान्यकार्योन्यतावपितादृशकार्यस्योक्तविशेषसामग्रीकार्यताव
च्छेदकाक्रान्तत्वानास्यात्तथाचविशेषसामग्रीविनातदुत्पत्तौतत्रतस्याव्यभिचारितानुकारणेनेव्याहत्येनइतिनतत्रतदुत्पत्त्याप्रतिर
रितिशंकनेनेइहेतिकार्योत्पादप्रयोजकसामग्रीसत्त्वेप्रयोजननत्वति नकार्योत्पत्त्यविरहणाद्धितथाचप्रकृतेसिषाधयिषाघटिता
यासामान्यकार्यप्रयोजकसामग्र्याःसिद्धिकालेपिसत्त्वेविशेषसामग्र्यविरहेणतत्कार्यतावच्छेदकावच्छिन्नाप्रत्यसंभवेपिसा
मान्यधर्मावच्छिन्नायतिदुर्वारैवेत्याहसामाजनिष्टेतिसामिथ्येनेनराङ्गमितिःकार्योत्पत्त्यादस्यतद्धर्मावच्छिन्नाद्गुत्पादस्यावि
नाकारणविरहेतद्धर्मावच्छिन्नोत्पादप्रयोजकसामग्रींविनानुमितिमतिपदत्तासहितपरामर्शत्वेनैवहेतुतानतुतानतुप
त्तापरामर्शयोःपृथक्कारणताद्वयगौरवात् नचविशेषणविशेष्यभावेविनिगमनाविरहःपरामर्शस्याहेतुत्वेनस्याव्याप्तिज्ञा
नरूपकरणव्यापारत्वासंभवात् व्यापारजनकतायाःफलजनकत्वगर्भत्वात् इत्यस्यैवविनिगमकस्यसंभवादितिकेचिवि
त्ततेहृदययतिकारणेत्यादि परामर्शस्येतिषष्ठ्यार्थोहृत्तिकारणतायामन्वयःनिमित्तकालरणस्यदण्डादेः समवायिकारणत्वेतिर
कपालादिनिष्ठघटत्वाद्यवच्छिन्नकारणेनेत्यर्थः समवायिनियमात्तत्कारणतायाआवश्यकत्वादितिभावःजन्यसत्त्वादवच्छि
न्नानिरूपितायांदंडादेर्व्यभिचारेणासंभवात् यथासंभवमित्युक्तं कारणत्वतदवच्छेदकत्वयोरुक्तविगमकेननियतत्वेपिसिध्य
भावसाहित्यपरामर्शत्वयोरेकविशिष्टस्यैवैकविशेष्यकतावच्छेदकतापत्त्रसौववापरस्यावच्छेदकत्व तत्रविनिगमनविर
होडवीरपवेतितत्तत्त्वेसिध्यभावस्यानुमितिहेतुत्वेऽनुमित्सांविराकदाप्यनुमितिर्नोत्पद्येतमणिसमवधानोत्पत्त्यकालेदा
हानुत्पत्त्याप्रतिबंधकाभावस्यकार्यकालसत्तयाकार्योपधानप्रजनकत्वात् अनुमित्यकालेचसिध्यभावस्यासत्त्वादसंगस्या
तस्यकारणतावच्छेदकत्वमेवनतुकारणतामित्याशंकतेअथेति कार्योत्पत्तिक्षणावच्छेदेनापिकार्याधिकरणेनियतसत्त्वंय
त्कालणज्ञाचटकंतत्कारणतानाश्रयस्यैवकार्योत्पत्तिक्षणसत्त्वंकार्योत्पत्तिप्रयोजकंयथामणिभावादेःसिध्यभावस्यप्रतिबंधक

भावरूपत्वेऽपि नियतप्राक्सत्त्वमेव कारणताघटकं न तु क्षणमपीति तस्य प्राक्सत्त्वमात्रं फलोत्पत्तौ तंत्रमिति नानुपपत्तिरिति
समाधत्ते यस्येति अन्वयेति सहचारदर्शनमात्रेणैव प्रतिबंधकताभावे कार्यसहभावेन हेतुतानियमसिद्धावित्यर्थः तथात्व
प्रसङ्गौ कार्यसहभावेन कार्यत्वप्रसङ्गो प्राभाकारा इति सहभावप्रसङ्गोद्रूपकस्यैव कारणतावादिन इत्यादि यत्त्वनुमितौ
प्रत्यक्षसामग्र्याः प्रतिबंधकतान्तरकल्पने गौरवात् तत्सामग्रीविरहायामनुमित्यापत्तिवारणायानुमित्यन्यासिद्ध्यभावस्य कार्यका
लवृत्तितया हेतुत्वमेव फलं अत्र नित्यभावस्य च प्राक्सत्त्वमात्रेण हेतुत्वांतरं कल्प्यतामिति तदसत् तत्सिषाधयिषानंतरमानसि
द्धिद्वितीयक्षणेऽनुमित्यनुत्पादप्रसंगात् कार्यकालेऽनुमित्सानाशेन तदभावविशिष्टसिद्धिसत्त्वात् प्रत्यक्षसिद्धिसत्त्वेऽसत्यां
च तत्सामग्र्यां वह्निज्ञानानंतरं जायतामितीच्छाबलादनुमित्सया तयानुमित्यन्यासिद्धौ तादृशेच्छाया उत्तेजकत्वात् तादृशेच्छाबला
प्रत्यक्षसामग्र्यनंतरं प्रत्यक्षोत्पादसमयेऽप्यनुमित्यापत्ते सिद्धावप्रामाण्यग्रहसत्त्वे प्रत्यक्षानुत्पादसमयेऽनुमित्यापत्तेश्चेति
पक्षतायाश्चानुमितिहेतुत्वमपी उर्वतागुरूणां मते सह प्राभाकरास्त्विति अनुमित्सयोपपन्नाया उत्तेजकत्वे द्वित्वन्निरासादिप्रका
रकेच्छाबलादनुमितिद्वितीयक्षणोत्पन्नपरामर्शात्तृतीयक्षणेऽनुमित्यंतरोत्पादस्य पक्षताहेतुनामतेऽप्युपपत्तेर्विनानुमित्सा
मिति १ क्वचित्प्रतिबंधकतांतरसत्त्वस्थले परामर्शानुमितिप्रवाहस्यानुक्रमोत्पन्नपरामर्शानुमितिसमूहस्यापलायनिरा
करणाय समूहपतानुसरणं पूर्वपूर्वानुमितिनाशो द्वितीयादिपरामर्शादनुमित्यंतरोत्पत्तौ बाधकाभावादाह अविरलम
स्येति ननु तत्रागमनैमेकैकक्षणविलंबेनैवानुमितिस्वीकार्यत्वमत आह कालभेदेति मानाभावात् फलाभावात् पक्षताहे
तुत्वस्यासिध्यागत्यंतरविरहस्यैवासिद्धेरितिभावः नन्वेवं सिद्धसाधनस्यादोषतया परार्थस्थले तदुद्भावनानुपपत्तिरित्य
त आह परार्थेति सिषाधयिषाविरहादितिभावः नच पक्षताया अनुमित्यहेतुत्वेऽनुमित्यनंतरं ज्ञानव्यक्तिरवकाशनो
त्पद्येतेतद्वारणाय तत्तज्ज्ञाने तत्त्यागानंतभावव्यक्तीनां सिषाधयिषानंतहेतुताकल्पने गौरवमिति वाच्यं ननु तदनुमितिव्यक्ति

ग॰
टू॰

40

पूर्वैतत्त्राशान्तरतोवाकस्यावित्समानविषयकानुमित्यंतरोत्पादसमयेनतद्व्यक्त्यापत्तिवारणायतत्रपरामर्शव्यक्तीनां
विशिष्यहेतुताया आवश्यकत्वात् ततएवप्रह्व्यक्तीनांपुनरुत्पादवारणसंभवात् नचपरामर्शानांतत्तद्व्यक्तित्वेनतत्र
दनुमितिव्यक्तिंप्रतिहेतुत्वेपिविनश्यदवस्थानदव्यवहितपूर्वोत्तरपरामर्शात्पुनस्तदनुमितिप्रसंगइतिवाच्यंएतन्म
तेकार्यसहवर्तिनःफलाजनकत्वात् तदनुरोधेनगुरुतरप्रत्यक्षादिसाधारणनिरूपणयत्वेनप्रतिबंधकत्वासिद्धेश्च
त्रकेचित् एतन्नायाअनुमित्यहेतुत्वमतेविनापिवह्न्यादिलिंगकवह्न्याद्यनुमितीच्छानाहृत्यानुमित्यनुत्पत्त्यानाहृत्या
मितौनाहृत्यानुमितीच्छाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्यकारणतापियाक्षेत्वंएतन्नाहेतुतामतेनाहृत्यानु
मितेरिच्छानियतत्वपातत्रेच्छायालघीयस्याहेतुत्वयैवोपपत्तेःएतन्नापितत्रेच्छैवेत्याहुः १ ॥ इतिश्रीगदाधरभट्टा
चार्यचक्रवर्तिविरचितानुमानमणिदीधितिएतन्नाटिप्पणीसमाप्ता ॥ ॥ शुभमस्तुसर्वजगतामितिशुभं ॥
इतिश्रीगदाधरीसंपूर्णसमाप्तम् ॥ ॥ ॥ शुभमस्तुलेखकपाठकश्रोतॄणाम् ॥ ॥ ॥ ॥

गादाधरी

पद्धता